JPADESASÂHASR^

BY

SR^MA HAGAVATPÂ ÂCHÂ YA

W t th C t y P d y ‹^

BY

' ^MAD AMAT^ T A



T Y

WÂ U EVA LAKS MAṆA SÂST ^ PAṆAS'KAR

PU L E Y

TUKÂRÂM JÂVAJÎ

PROPRIETOR OF THE NIRNAYA SAGAR" PRESS

Bombay

1914.

Pric n Rup e

Pu l h r: Tu m J vaj } th N n ya- ar P s
P n : R. Y Sh d , } 23 K bh L B b y




श्रीमद्भगवत्पादाचार्य णीता

उपदेशसाहस्री



पद्योजनि ख्यया श्रीमद्र ीर्थविरचि

य ख्यय सवलि ।



अय ग्रन्थ

शीकरो ाह्वविद्वद्वरलक्ष्म श ं ज

व ्देव र्मणा सस्‌ त

मुम्बय्य

तु ार जाव ी ेष्ठि

स्वीये निर्णयसागराख्यमुद्रणयन्त्रालयेऽङ्कयित्वा प्रकाशित

३५ ९

मू० १ रू यकम्

पदेशक्षमं ललितच्छन्दोबद्धमर्थगम्भीरं च विद्यते एतद्व्याख्यापि मञ्जुलैव व्याख्यात्रा प्रणीतास्ति संप्रत्यस्यैकं स याख्यं २ द्विशतवर्षेभ्य. पूर्व लिखितं पुस्तक प्रायःशुद्धमुपलब्धम् तस्मात्पूर्वमुद्रित संवाद्य सम्यक्परि शोध्यास्माभिरिदं सुचिक्कणपत्रेषु मधुराक्षरै सुव्यवस्थया मुद्रितमस्ति अस्य सर्वोपयुक्तत्व सौभाग्यंच दर्शनसमकालमेव स्फुटीभविष्यति

विद्वदेकान्तवशंवद **पणशीकरो वासुदेवशर्मा**



उ देश ाह ी रणनु म

इति उपदेशसाहस्रीप्रकरणविषयानुक्रमः

अथात्र प्रास्ताविकम्



वेद क पेभ्यो नम्‌ धूत्त म्‌

ज्हा लि गो स्त ै द्रु वे :

इह जगति धर्मादिचतु:पुरुषार्थसपत्तिर्हि वेदार्थज्ञानाधीनेति निर्वि वादम् वेदस्तदर्थश्चातिगहन इति तदर्थमाकलय्य लोकोद्दिधीर्षुणा परमकारुणिकेन श्रीमच्छंकराचार्येण नैकश सन्ति संदब्धा ग्रन्था: शंकराचार्यस्तावत्कलिगतेषु ३८८९ वर्षेषु प्रादुर्बभूवेति विज्ञायते तथा चोक्तं शकरमन्दारसौरभे **प्र सूत ति यशरदामतिया वत्या मेकाद ाधि शतोनचतु सह याम्** इति अन्यत्रापि **निधि न गेभ ह्वयब्दे ३८८९ विभ मासि धवे क्रे ति थौ द यां श रार्योदय मृत** इति च तेन वैक्रमवत्सरमानेन ८ ५ मिते वर्षगणे प्रादुर्बभूवेति निश्चीयते यद्यप्यत्र विषये भिन्न भिन्नारभव्या विवदन्ते विद्वांस: तथापि शिरोनिर्दिष्टप्रमाणेनायमेव तेष मवत रसमय इति न सिद्ध न्त आस्तामयं समयविवाद· यत्तैरवतीर्या खिलधरामण्डले अद्वैतवेदान्तसिद्धान्तप्रणयनादिभिरतीवोपकृतं न तथान्येन केनापीति जगद्गुरुत्वमेषामेवाधिकं राजते तत्प्रणीतेष्विय **पदेशसाह ी** १९ एकोनविंशतिप्रकरणोपेता अद्वैतवेदान्तसिद्धा न्तानुद्बोधयन्ती जागर्ति सर्वत्र भारतवर्षेषु अस्या एकैकं पद्यं सर्वो

पदेशक्षम ललितच्छ दोबद्धमर्थग भीर च विद्यते एतद्व्याख्यापि मञ्जुलैव व्याख्यात्रा प्रणीतास्ति संप्रत्यस्यैकं स य ख्यं २ द्विशतवर्षेभ्यः पूर्वं लिखितं पुस्तकं प्रायःशुद्धमुपलब्धम् तस्म त्पूर्वमुद्रित संवाद्य सम्यक्परि शोध्यास्माभिरिद सुचिक्कणपत्रेषु मधुराक्षरै· सुव्यवस्थया मुद्रितमस्ति अस्य सर्वोपयुक्तत्व सौभ ग्यंच दर्शनसमकालमेव स्फुटीभवि यति

विद्वदेक न्तवशवद **पणशी रो वासुदेवश ि**

उ दे ाह ी रण नु

इति उपदेशसाहस्रीप्रकरणविषयानुक्रम



श्री च्छङ्कर चाय णीता

उपदेशसाहस्री



श्रीमद्रामतीर्थविरचितपदयोजनिकाव्याख्यायुता

उपोद्घात करणम् १

यत्र ध्यस्तमिद सर्वं मेयम त्र द्यविद्यय
भ ति नो भाति यज्ज्ञानात्तदस्मि ब्र चित्सुखम् १

तदेवं सर्वोपनिषदर्थस रसंग्रह गद्यब धप्रब धेन सक्षेपतो युक्त्यो पदिश्य पुनरप्युक्तमेवार्थजातं पद्यब धप्रब धेन सोपस्कर विस्तरेणो पदेष्टुकामो भगवा भा यकारः पद्यग्र थार भे ग्र थप्रतिप द्यपरदेवता नमस्क ररूप मङ्गल कृत शि यशिक्षार्थं श्लोकेनोपनिबध्न ति

चैत य सर्वग र्वं र्वभू ह मु
(°वि याती सै र्वविदे म १

चै यमि ति तसै सामा यत· प्रसिद्ध य नम· प्रह्वीभावो भूय दि र्थ. तस्य विशेषजिज्ञासायां लक्षणमाह सर्वविद इति सर्वं वेत्तीति सर्ववित्तसै सर्वश देन भूत भवद्भवि यदि तद मक जगदुच्यते तत्सर्वं सर्वावस्थ सर्वदा सवितृवत्सनिधिसत्तामात्रेण प्रक श

।

यत्सर्ववित् नहीद जडं स्वसत्तास्फूर्त्योः स्वतन्त्रं भवति अतो यदधी नसत्तास्फूर्तिमदिदं तदस्ति सर्वज्ञ सर्ववित्सर्वाश्रय इति तटस्थलक्षणं सिद्ध भवतीति भावः एवं जगत्प्रवृत्तिस्थितिसंहारनियामकत्वेन स मात्रतया ताटस्थ्येन लक्षितस्य स्वरूपलक्षणं वदन् सर्वविषयवेदना श्रयतया सर्ववित्त्वमिति वैशेषिकादिमताशङ्कां वारयति चैत यमि ति य ैत यं चितिस्वभ वं ज्ञानस्वरूपं तस्मै इति यत्तच्छब्दयोः संब धः विज्ञानमान दं ब्रह्म सत्यं ज्ञानमन तं ब्रह्मे त्य दिश्रुतिभ्यः नह्य च्चित्स्वभ वस्य चिद्धर्मकता युज्यते न खल्वनुष्णस्वभावकं .लमु णत्वधर्मक भवतीति भावः चिदेकरसस्यापि सर्वज्ञत्वं मायोपा धिक यावहारिकमित्यनवद्यम् न चेतनोऽणुपरिमाण इत्येकदेशि नो मध्यमपरिमाण इति दिगम्बरा म य ते अतस्तस्य सर्वविषयसंस र्गभावे कथं सर्वज्ञत्वम् प्रकाशो हि स वित्रादिः स्वसंसृष्ट एव प्रकाशव्यवहारहेतुर्नासंसृष्टे विषय इत्यत आह सर्वगमिति 'नित्यं विभुं सर्वगतं आकाशवत्सर्वगतश्च नित्यः स पर्यगा च्छुक्र मित्यादिश्रतिविरोधादणुपरिमाणत्वादिकल्पनानवक श इति उत्क्रान्त्यादे र्लिङ्गोप धिकत्वश्रवणान्न तेन स्वाभाविकविभुत्वार्थकश्रुति बाध इति दिक् ननु सर्वगमित्युक्ते सर्वम यत्तद्गतं च ब्रह्म यदिति तस्य वस्तुपरिच्छेदप्रतिभ सात्सांख्यादिवादिमतवत्सजातीयविजाती यभेदवत्त्वं प्र प्तमित्यत आह सर्वमिति सर्वं खल्विदं ब्रह्म इद सर्वं यदयमात्मा आत्मैवेदं सर्वमि त्यादिश्रुतेरित्यर्थः अनेन सर्वोपा दानत्वमुक्तम् उपादान हि स्वकार्यं सर्वं यासुवध्य पक भवति नानु पादानम् तद्धि देकदेशेन संसृज्यमानमव्यापकमेव भवतीत्यतः सर्वो पादानत्वात्सर्वमित्यभिप्रायः सव त्मकमपि ब्रह्म जीवाद्व्यावृत्तं जीवस्य

१ त्यादिलिङ्ग २ तद्ध्येकदेशेन

ब्रह्मणोऽभिन्नत्वात् नह्यसंसारि संसारिभावेन विरुद्धधर्मव गोरैक्य सभवति दहनतुहिनवदित्यत आह सर्वभूतगुहाशयमिति सर्वे भूतानां स्थावरजङ्गम नां गुहासु बुद्धिषु शेत इति सवभूतगुह शयम् गूढा अस्यां ज्ञानज्ञेयज्ञातृपदार्था इति गुहा बुद्धिः गूहते सवर ण र्थस्य धातोरिद रूपम् सर्वप्राणिबुद्ध्य तःसाक्षितया निर्विकार वर्तत इत्यर्थः तथाच श्रुतिः यो वेद निहित गुहायां परमे व्योमन्' हृद्य तज्योतिः पुरुषः स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृदय मित्याद्या तथाच तत्सृष्ट्वा तदेव नुप्राविश दित्य दिना स्रष्टुरेव ब्रह्मणो जीवरूपेण प्रवेशश्रवणात् अयमात्मा ब्र त्यादितादा त्म्यश्रुतेश्च न ब्रह्मणोऽ यो जीव इत्यवधार्यते विरुद्धधर्मसंसर्गप्रात भासस्तूपाधिनिब धनो न स्वरूपनिब धन इति भावः एतेन जीवो नाम ब्रह्मणोंऽशो विकारो वा स्वतन्त्र एवेति भेदाभेद(भेद)वादिपक्षा निराकृता वेदितव्याः **ननु** सर्वभूतगुहाशयत्वे ब्रह्मणो मानसवेद्यत्वं स्य त्तथा सर्वात्मत्वे प्रपञ्च त्मत्वप्राप्तिरिति शङ्कायामाह यत्सर्वविषय तीतमिति सर्वमविद्यातत्कार्यात्मकं विषयमतीत्य[२] यवस्थितमित्य क्षरार्थः माय तु प्रकृतिं विद्य मायिनं तु महेश्वर मित्य दिश्रुते परमेश्वराधिष्ठितमायाविवर्तत्वावगमात् सर्वस्य मायायाश्चानिर्वच नीयत्वाच्च परमार्थ किमपि ब्रह्मणो भिन्नं वस्त्वस्ति तथा तत् सवा तः करणतत्प्रच रसाक्षिणो न मानसवेद्यत्व संभाव्यते । नहि मि थ्य ष्टिगृहीतेन मरीच्युदक दिन भूम्याद्युदकादिमत्परमार्थतो भ ति नवा का नाग्नि' प्रक श्यते दह्यते वा अतो युक्त सर्वविषयातीत त्वमिति भावः तथाच श्रुतिः नेतिनेति नेहनानास्ति किंचन यतो वाचो निवर्त ते अप्राप्य मनसा सहे त्याद्या अत्र चैत यमि

१ एववेति भेदा २ त्यावस्थित

ादिविशेषणत्रय तत्वपद र्थस धारण सर्वभूतगुहाशयमिति च बुद्ध्या-दिसाक्षी त्वंपदार्थ उक्तः सर्ववित्पदेन तत्पदव च्यं ब्रह्मोच्यते सर्ववि-षयातीतमिति तत्पदलक्ष्यमुक्तम् यत्त-च्छब्दयोः सामानाधिकर यादे क र्थवृत्तित्वे सति तत्त्वंपद र्थयोरैक्यमख डवाक्य र्थस्तात्पर्यवृत्त्या प्रतिप दितो भवति तदेवं मङ्गलाचरणव्याजेन वेदा तशास्त्रीयविषया द्यनुब धोऽ यत्र प्रपञ्चितोऽस्य तत्प्रकरणत्वद्योतनाय तथाहि उक्त वाक्यार्थे विषयश्चैत य सर्वविषयातीतमिति च चिदात्मन' सर्वानर्थ सस्पर्शित्वाभावोक्तेरशेषानर्थनिवृत्त्युपलक्षितं निरतिशयान दाविर्भा-व त्मक ब्र ैव प्रयोजन क्तम् अर्थात्तत्कामोऽधिकारी सूचित एव भवति उक्तविशेषणानां वेदा ते वेव प्रसिद्धेः शास्त्रब्र णोः प्रतिपा द्यप्रतिपादकभ वः सब धो ध्वनित इति १

एव देवतानमस्कारव्याजेन वेदा तप्रतिपाद्यपरदेवतातत्त्वमुपक्षि-सम् इद नीं वेदानां तत्परत्वं प्रतिप दयितुं कर्मका डनिर्वृत्तमर्थमनूद्य तेन ज्ञ नका डाख्यवेद तानां सगतिमभिदधानस्तेषामगतार्थत्वमन यशेषत्व च तावदाह

म य त्रिय व द र ाध नपूर्विका
विद्य थेदानीं वक्तु वेद प्रच मे २

ा येति वेद इदानीं ब्रह्मविद्यां वक्तु प्रचक्रम इत्य वयः इद नीमिति जिज्ञासोरुपस्थितिसमय उक्तः अथेति जिज्ञासाप्रवृ त्तिप्रयोजकहेतुसाधनचतु यसपत्त्यान तयमुच्यते तथाच विवेक वैरा यशमादिसाधनसप स्य मुमुक्षोर्मोक्षस धनब्र विद्या साक्षात्प्रति पादयितु ज्ञानक डात्मको वेदः प्रवर्तत इत्यर्थः कुतोऽस्य साधनस

१ वेदान्ता ।

पत्तिरित्यपेक्षायां कर्मकाण्डोक्तकर्मानु ानजनितबुद्धिशुद्धित इत्यभिप्रेत्य ह समापय्येत्यर्धेन दाराग्न्याधानपूर्वका इति विहितक्रियाम त्रोपलक्षणम् नित्यनैमित्तिकप्रायश्चित्तोपासनारूपाः सर्वाश्रमप्रयुक्ता विधिविहिताः सर्व ः क्रिय ः समापय्य समाप्तिं प्र पय्य कर्मका डात्मनानुष्ठेयकर्माणि प्रतिपाद्य स्थितो वेद इति सब धः अय भावः वेदो हि स्वतःप्रमाणभूतः सर्वार्थप्रकाशको नित्यनिरतिशय पुरुषार्थमर्थयमानस्य तदुपायं मृगयतः सर्वोत्साहं प्रयतमानस्यापि तमलभमानस्य ताद्दक्पुरुषार्थसाधन प्रत्यक्षादिभिरनवगम्यमानमुपदेष्टु प्रवर्तते नित्यनिरतिशयपुरुषार्थश्च मोक्ष एव न य इति मोक्षोपाय प्रतिपादने वेदतात्पर्यमवगम्यते श्रुतिस्मृती चात्र भवतः सर्वे वेदा यत्पदमामनन्ति सवे वेदा यत्रैकीभवन्ति स मानसीन आत्मा जनाना मिति वेदैश्च सर्वैरहमेव वेद्य इतिच मोक्षसाधनं च साक्षा दात्मतत्त्वज्ञानमेव तमेव विदित्वातिमृत्युमेति ना य॰ प था विद्यते ऽयनाये तिश्रुतेस्तच्च नाशुद्धा तःकरणस्योपदेष्टुं युक्त तस्य तद्ग्रहण सामर्थ्याभ वात् श्रतिश्च भवति न विरतो दुश्चरितान्नाश तो नासमाहितः नाशा तमानसो वापि प्रज्ञानेनैनमाप्नुया दिति अत स्तस्य ज्ञानोत्पत्तिप्रतिब धकदुरितक्षयार्थानि नित्यानि कर्माणि प्रथमं विद्य ते त नि च संयोगरूपचोदनासमाख्य नामविशेषेण सर्वश स्वा- प्रत्यय य येनेतिकत०याङ्गकलापपरिमाणाधिकारिविशेषोक्तिपूर्वकमनु ष्ठापयति धर्मेण पापमपनुदति न कर्म लि यते नरे अविद्यया मृत्युं तीर्त्वे त्यादिश्रुतेर्दुरितक्षय एव धर्मानुष्ठ नस्य पर प्रयोजनं पर परया परमपुरुषार्थोपयोगित्वात् नतु कर्मणा पितृलोक इत्याद्युक्त पितृलोकादिः प्रयोजनम् तस्य क्षयादिदोषदुष्टतया हेयत्वात् अ नुष ङ्गिक हि तत्कर्मफल भवति नवदपि नेद चित्तशुद्धिप्रतिब धकम्

तदुक्तं सुरेश्वराचार्यैः. नित्येषु शुद्धिप्रधा याद्योगोऽप्यप्रतिबन्धकः. भोगमङ्कुरमीक्ष्यन्ते बुद्धिशुद्धिस्तु रोचत इति काम्याभिचारादि कर्मविधानं तु पुरुषवशीकरणेन स्वाभाविकप्रवृत्तिनिवारणार्थमित्येषा दिक् तथाच चित्तशुद्धेः प्रथमपेक्षितत्वात्तदर्थं कर्मविधानं प्रथमं प्रवर्तते पश्च ज्ञानोपदेश इति कर्मज्ञानकाण्डयोरर्थद्वारा हेतुहेतुमद्भावेन पौर्वापर्यसंबन्ध उक्तः ज्ञानकाण्डस्य साक्षात्फलार्थविषयत्वात्कर्मभिरनपेक्षितार्थत्वाच्चागतार्थत्वमनर्थशेषत्वं च तस्य सिद्धमिति २

ननु कर्माणि कृतानि कर्तुः फलप्रदानि लोके दृष्टानि यथा पित्रादिभिरुपदिष्टविषयाणीष्टफलानि तैर्निषिद्धविषयाण्यनिष्टफलानि, तदुदासविषयाणि दैवाधीनतयोभयार्थानि तथा वेदविहितानि कर्माणीष्टफलानि निषिद्धान्यनिष्टफलानि विहितप्रतिषिद्धव्यामिश्रकर्माणीष्टानिष्टव्यामिश्रफलानि भवन्ति तथाच शास्त्रं अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलमिति एवंच कर्मणां फलाव्यभिचारा मोक्षस्य च फलविशेषत्वात्कर्मविशेषसाध्यत्वोपपत्तेर्न विद्यया कृत्यमस्तीति न तदर्थानि ज्ञानकाण्डानि मुमुक्षुणा विचारणीयानि किंतु कर्मण्येव कानिचिच्चातुर्मास्यादीन्यक्षय्यफलार्थान्यनुष्ठेयानीति कर्मजडानां प्रत्यवस्थानमित्याशङ्क्याह

कर्माणि देहयोगार्थं देहयोगे प्रियाप्रिये
ध्रुवे स्यातां ततो रागो द्वेषश्चैव ततः क्रियाः ३

र्माणीति द्वाभ्याम् कर्मफलं हि जात्यायुर्भोगलक्षणं तच्च देहसंबन्धं विना नोपपद्यत इति कर्माणि देहयोगार्थमेवेत्यर्थः देहयोगे च संसारो दुर्वार इत्याह देहयोग इति देहसंबन्धे सति

प्रियाप्रिये सुखदुःखे ध्रुवे स्यातां भवेत मेव   न वै सशरीरस्य सत.
प्रियाप्रिययोरपहतिरस्ती तिश्रुते   ततः सुखदु'खयोस्तत्साधनयोश्च
यथासख्यं रागद्वेषौ वासनारूपौ स्याताम्   ततो रागद्वेष ख्य न्निमि
त्तात्क्रिया वाङ्मनःकायचेष्टाः स्युरित्यर्थः   ३

धर्म धर्मौ त तो स्य देहयोगस्तथ
एव नित्य तोऽय स रश्चक्रवद्भृ म्

अज्ञस्य प्रत्यगात्मतत्त्वं ब्रह्माजानतोऽहंकारपारवश्यस्य तत क्रिया
भ्यो विहितप्रतिषिद्धरूपाभ्यो धर्म धर्मौ पुनर्भवेताम् पुनस्ततो देहयो
गस्ततः प्रियाप्रिये इत्येवं संसारो ज ममरणकर्मकरणतत्फलभोगल
क्षणः कुलालचक्रवद्भृशमत्यर्थमविश्रमं यथा स्यात्तथा नित्यप्रवृत्तो
ऽनादिक लमारभ्य प्रवर्तते अयं प्रत्यक्ष इत्यर्थः तस्य दैहिक र्थानां
कर्मणामनित्यफलत्वस्य लोके न्दृष्टत्वादामुष्मिकफल र्थानामपि कर्म
त्वान्नित्यफलतानुमानात् तद्यथेह कर्मजितो लोकः क्षीयत एव
मेवासुत्र पु यजितो लोकः क्षीयत इति वस्तुबलावलम्बिश्रुतेश्च
अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृत' मित्याद्यर्थवादश्रुत्यवलम्बनेन
कर्मफलस्य नित्यत्वाशा न कार्येति भावः   ४

न चेवमपि न मोक्षार्थिनो ज्ञानेन प्रयोजनमस्ति कृतकर्मण
संसारनिमित्तानां फलभोगान तरं नाशेसति निमित्ताभावान्नैमित्ति
काभाव इति यायादयत्नलभ्यत्वा मोक्षस्येत्याशङ्क्याज्ञानमूलत्वात्कर्म
णस्तस्मि सति तदनुपरम मेवमित्याह

अज्ञान तस्य मूल स्यादिति तद्धानमि यते
विद्यात अ र धा त तो नि श्रेयस भवेत्   ५

मेचित' पुण्यच्चितः इत्यपि पाठः

अज्ञानमिति यद्वा अज्ञस्य कर्मप्रवृत्त्यविरमत्ससराविरम क्लृतकर्मफलभोगसमयेऽपि कर्मप्रवृत्त्यवश्यभावात्पुनर्भोगसंतानाविच्छे दश्चेत्कथ तर्हि कर्मनिवृत्त्या मोक्षसिद्धिरिति विवक्षायामाह अज्ञा नमिति अयमर्थः नीहारेण प्रावृता जल्प्या चासुतृप उक्थश स श्चरन्ति 'एक शत्रुर्न द्वितीयोऽस्ति शत्रुरज्ञानतुल्यः पुरुषस्य राजन् येनावि : कुरुते कार्यते च घोराणि कर्माणि सुदारुणानी त्यादिश्रुतिस्मृतिभ्योऽज्ञानं तस्य पूर्वोक्तस्य कर्मतत्फललक्षणस्य संसारस्य मूलं स्यादिति हेतोस्तस्याज्ञानस्य हानमात्यन्तिकोपरम इ यते यत्नेन संपादनीयतयाभिप्रेयते मूलो मूलनम तरेण प्ररोहा विच्छेदादित्यर्थः तरति शोकमात्मवित्' यदा चर्मवदाकाश वे यिष्यन्ति म नवा. तदा देवमविज्ञाय दुःखस्य न्तो भवि यति ज्ञानेन तु तदज्ञ न येषां न शितमात्मन' तेपामादित्यवज्ज्ञ न प्र ाशयति तत्पर मित्यादिश्रुतिस्मृतिभ्यो यतोऽविद्यैवाज्ञ नहानहेतु रवगतातो ब्रह्मविद्य र धा अतो ब्रह्मविद्यया निःश्रेयसं कैवल्य भवे त्तदुदये न तरायकतयाऽज्ञ ननिवृत्तौ केवलात्मस्वरूपावस्थानरूपो मोक्षो ल ध इव भवेदित्यर्थः ५

ननु कर्मणां विचित्रशक्तित्वात् हिर यदा अमृतत्व भज त इत्य दिश्रुते कर्मणैव हि संसिद्धिमास्थिता जनकादय इत्यादिस्मृतेश्च कर्मभिरेव मोक्षसिद्धेः कथं त ब्र विद्ययेति शङ्कामपाकुर्वन्नन तरोक्त मर्थमुपपादयति

वि ैव ा ह नाय न ै तिकू
न न ह े हि रागद्वे क्षयो भ े त् ६

विद्यवेति द्वाभ ाम् ससारमूलाज्ञ नहानाय विद्यैव समर्थेत्य

ध्याहारः एवकारार्थमाह न कर्मेति तत्र हेतुरप्रतिकूलत इति अविरोधादित्यर्थः विद्यैव प्रक शरूपत्वादप्रकाशरूपामविद्यां तत्कार्यं च निवर्तयति यथा रज्ज्वावरणाविद्यां तमसि तत्कल्पितसर्पाद्याक र च रज्जुतत्त्वज्ञानप्रदीपौ निवर्तयतः स्वभावविरोधात् कर्म तु नाज्ञानतमोनिवर्तकं तदविरोधित्व दप्रकाशात्मकत्व द्वा नीहारस्तोमवदित्याद्यनुमानैः ना यः प था विद्यतेऽयनाय इत्यादिश्रुतिभिश्च विरोधाद्धिर यदा इत्यादावापेक्षिकममृतत्वं पर्यवस्यति कर्मणैव ही ति स्मृतिः न कर्मणा न प्रजये तिश्रुतिविरोधेऽ यपरेत्यतो न तद्बला त्कर्मभिरज्ञ नहानशङ्केत्यभिप्रायः विद्यां विनाऽज्ञानक्षयाभावश्चेद ज्ञानक्षयार्थमेव विद्यान्विष्यतां तत्क र्यस्य तु परमार्थत्वाद्विद्यया नाशानुपपत्तेस्तन्नाशे हेत्व तरम न्वेषणीयमित्यत आह नाज्ञानस्येति अज्ञानस्य प्रहाणे रागादिक्षयो न स्याद विवेकपूर्वकत्वस्य रागादाव व यव्यतिरेकसिद्धत्वादज्ञानमया रागादयो न परमार्था इत्यज्ञाननिवृत्त्यैव निवर्त त इति न तत्र हेत्व तरा वेषणेत्यर्थः ६

रागाद्यनिवृत्तौ का हानिरिति तत्राह

रागद्वेषक्षयाभावे कर्म दोषोद्भव ध्रु म्
तस्मान्नि श्रेयसार्थाय विद्यैवात्र विधीयते ७

रागद्वेषेति दोषा रागद्वेषमोहास्तदुद्भव तद्धेतुकं कर्म ध्रुवं पुनः स्यादेवेति पुनः संसारो दुर्वार इत्यर्थः उपपादितमर्थमुपसंहरति तस्मादि ति अत्रेति वेदा तोक्तिः विधीयते प्रकाश्यत इत्यर्थः ७

तदेवमज्ञानमूलत्व त्संसारस्य ज्ञानमेव तन्निवर्तकं मोक्षहेतुर्न कर्म युक्त तत्र यदि कर्मणां स्वात येण मोक्षहेतुता न सभवेत्तर्हि ज्ञानेन समुच्चयेसति तद्धेतुत स्य दिति स च्चयवादिमतमुत्थ पयति—

ननु ै तथा नित्य क य जीवने ति
विद्या ा सहकारित्व मोक्ष ति हि द्रजेत् ८

ननु कर्मेति नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणै रिति स्मृत्युक्त यायेनावशे नापि जीवत पुरुषेण कर्म कर्त यमेव विद्य यथा तथा नित्यं कर्मावश्यं कर्त यं यावज्जीव मित्यादिश्रुतिविहितत्वादित्यर्थः उपयोगाभावा मुमुक्षुणा नित्यं कर्म न कर्त यमित्यत आह विद्यायाः इति विद्याया मोक्षप्रति कारणभूत याः सहकारित्वमितिकर्त यभावं हि यस्मात्तत्कर्म व्रजेत्प्राप्नुयादतस्तत्कार्यं मुमुक्षुणेत्यर्थः विद्ययामृ तमश्नुत इति तृतीयया ज्ञानस्य मोक्षकरणत्वावगमात्करणस्य चेति कर्त यतासापेक्षत्वाद् यस्य चेतिकर्त यस्यात्राभावात्कर्मभिरेव प्रयाजा दिभिर्दर्श दीव फलोपकार्यङ्गैर्ज्ञानं समुच्चीयत इति भावः ८

कर्मणा बध्यते ज तुर्विद्यया च विमुच्यते तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिन इत्यादिस्मृतेर्मुमुक्षुभिः कर्म न कर्तव्य-मिति चेत्तत्राह

यथ विद्या तथ कर्म चोदितत्वाविशेषत
त्यवायस्मृतेश्चैव कार्य कर्म मुमुक्षुभि ९

यथा विद्येति यथा विद्या मुमुक्षुभिः कार्या तथा कर्मापि कर्त यम् कुतः विद्यां चाविद्य च यस्तद्वेदोभयं सह ेति समुच्च यविधिना अविशेषेण चोदितत्वादित्यर्थः किंच अकुर्वन्विहितं कर्म निन्दितं च समाचरन् प्रसंजश्चेन्द्रियार्थेषु नरः पतनमृच्छति इत्यनन्तु ाने प्रत्यवायस्मृतेश्च कर्म कार्यमित्यर्थः तथाचोदाहृतश्च

तिस्मृतिविरोधे तस्मात्कर्म न कुर्वन्ति यतय इतायमपि स्मृतिर्ज्ञान प्रशस र्थो वा भविष्यतीति भावः ९

अत्र सिद्धा ती विद्यायाः सहकार्यपेक्षितत्वमुक्तमाक्षिपति

ननु ध्रुवफला विद्या ना य त्किंचिदपेक्षते
न ि ोमो यथैव यद्ध्रुवक र्योऽ यपेक्षते १

न वि ति ब्रह्मविद्या सहकारिनिरपेक्षा ध्रुवफलत्व द्घटादिज्ञान वदित्यर्थः पूर्ववादी यभिचारेण परिहरति ने ति अवश्यं भाविफलोऽप्यग्निष्टोमो यथोद्गीथशस्त्रादितद्गतदेवताज्ञानसहकारिक र्मापेक्षते तथा विद्यापीत्यर्थः १

पूर्वपक्षमुपसंहरति

तथा ध्रुवफला विद्या कर्म नित्यमपेक्षते
इत्येव केचिदि न्ति न कर्म तिकूलत ११

इत्येव केचिदि च्छ तीति सिद्धा तं वक्तुमुपक्रमते नेत्या दिना विद्या स्वकार्ये न कर्मापेक्षते तत्प्रतिकूलत्वात्तद्विरोधित्वात्ति तियावत् नहि स्वप्रतिकूलः स्वसहायो भवति माभूत्तिमिरं तेजसः सहायभूतमित्यर्थः ११

कर्मणो विद्याप्रतिकूलत्वमुक्तं साधयति

विद्य या प्रतिकूल हि कर्म स्यात्स भिम नत
निर्विकारात्मबुद्धिश्च विद्येतीह प्रकीर्ति १२

विद्याया इत्यर्धेन हिशब्दः प्र सिद्धिद्योतकः साभिमानत इति ब्र ह्म याद्यभिमानसहितपुरुषनिर्वर्त्यत्वात्कर्मणो विद्यायाश्च कूटस्थ त्मा

कारतया जात्याद्यभिमानहीननिष्ठत्वात्प्रसिद्धो विद्याकर्मणोर्विरोध इत्यर्थः हिशब्दद्योतितां प्रसिद्धिमुपपादयति निर्विकारेति न ह कर्ता भोक्ता किंतु कूटस्थं ब्रह्मैवासीत्येवमात्माकारा त:करणवृत्तिविद्येति इह वेदा तेपु विद्वद्भिः प्रकर्षेणोक्तेत्यर्थः कर्मत्वहं ब्राह्मणोऽस्य कर्मण कर्ता ममेदं कर्मसाध्यं फलं भविष्यतीत्यभिमानपूर्वकं प्रवर्तत इति प्रत्यक्षमतः स्फुटो विरोध इत्यर्थः १२

ज्ञानकर्मणोर तर्मुखत्वबहिर्मुखत्वाभ्यां प्रवृत्तितो विरोधमुक्त्वोत्पत्तितो विरोधमाह

अह कता ममेद स्यादिति कम व ते
स्त्वधीना भ द्विद्या त्रधीनो भ द्विधि १३

वस्त्वधीनेति प्रम णवस्त्वधीना विद्या यथाप्रमाणं यथावस्तु च जायते न तत्र पुरुषस्वातन्त्र्यं संभवतीत्यर्थः विधिर्विधेयं कर्म कर्त्रधीनं पुरुषेण कर्तुमकर्तुम यथा वा कर्तुं शक्यमतः पुरुषस्वात न्या स्वात न्यरूपविरुद्धहेतुज यत्वान्न कर्मज्ञानयोः समुच्चय इत्यर्थ १३

किंच विद्यायां सत्यां कर्मणो निराश्रयतया स्वरूपालाभान्न ज्ञान सहकारितेति विध्य तरेण विरोधमाह

रक युपमृद्न ति विद्य द्धिमिवोखरे
इति तत्सत्यम दाय कर्म क यवस्यति १४

क रकाणीति ऊखरदेशे जातामुदकबुद्धिं यथोखरस्वभावावलम्बिनी विद्योपमृद्नाति तथात्म यविद्याध्यस्तकारकबुद्धिमात्मस्वभावावलम्बिनी विद्योपमृद्नात्येवेत्यर्थः इति तत्सत्यमित्यर्धश्लोकः पूर्वेणान्वेति उपमृद्नातीति यतोऽतस्तत्कारकजात सत्यमादाय कर्म कर्तुं ज्ञ नी कथ व्यवस्यतीति कथशब्दाध्याहारेणाय योजनीयः १४

विरुद्धत्वकृतसमु यासभवे फलितम ह

विरुद्धत्व द य र्म क ° न वि
है विदु । ९ म हेय क्षुण ५

विरुद्धत्वादिति अतो विरुद्धत्वादिति सामानाधिकर यम् विद्यया सह कर्म कर्तुं विदुषा न शक्यमेवे य वयः । समु यनिराक रणफलमाह तस्मादिति १५

ननु ज्ञात्वा कम समाचरे दित्य दिवचनात्स्वर्गकामादिविध्य यथानुपपत्तेश्च देहादि यति रिक्तात्मज्ञानवत. कर्मानधिकारात् ज्ञानकर्मणोर्विरोधे च तदयोगादधि र्यभावेन कर्मका डस्याप्रामा य प्राप्तमि ।शङ्क्य कर्मस्वरूपभेदाङ्गविशेषप्रयुक्तक्रमाधिकार दिविशेषज्ञानस्य देहादि यतिरिक्तात्मज्ञानस्य च कर्मविशेषाधिकारि यपेक्षितत्वेऽपि न परमात्मतत्त्वज्ञानं तत्रापेक्ष्यतेऽनुपयोगादधिकारिविरोधाच्चेत्य भिप्रेत्य समाधत्ते

देह ैरविशे देहिनो ह नि जम्
ाणि ना तदवि ोत्थ । त्कर्मविधिर्भ त् १६

देहाद्यैरिति यद्वा यद्यौपनिषद ज्ञ न कर्मकारकभेदोपमर्दक स्यात्तदा ज्ञानका डेन कर्मका डस्य नि र्विषयीकरणाद्ब धितविषयं कर्म का मप्रमाणं स्य त्तच्चानिष्ट स्व ध्यायाध्ययनविधिविरोधादित्याशङ्क्य किमात्म त्वज्ञाना प्र गूर्ध्वं वा तदप्रामा यापत्तिरि ति विक९ य द्यं निरा करोति देह द्यैरिति देहिन आत्मनो देह द्यैरिन्द्रियमनोबुद्धिप्र णतद्धर्मैरविशेषेणाविवेकेन ग्रहण तद्भ्रिशि तयैवात्माभिम नरूप निज स्वाभाविक न योषिद दाव य दिभा बुद्धिवद्विध्यधीन यदेवविध प्रा

णिनामात्मज्ञानं तदविद्योत्थमनाद्यज्ञानजभ्रान्तिसंस्कारोत्थं सर्वसाधारणत्वाद्यावदेवं ब्राह्मणोऽहं गृहस्थोऽह सकले द्रियवानहं सकामो बलवानित्य दिज्ञानमनुवर्तते तावत्कर्मविधिः कर्मका डं प्रमाणं भवेदित्यर्थः प्रमितिजनक हि प्रमाणं भवति अधिकारिणश्च प्रमितिजनको वेदो न नधिक रिण इति स्थिते कर्मप्रवृत्तिपर्य तं प्रमितिजनकस्य विधिका डस्योक्ताधिकारिल भान्न ब्रह्मात्मतत्त्वविद्योदयात्प्रागप्रामा य प्राप्तिरिति नाध्ययनविधिविरोध इति भावः १६

द्वितीयं विकल्पमि ापत्या प्रत्य चष्टे

नेति नेतीति देहादीन ोह्य त्म ेषि
अवि ा बोध र्थं तेन वि द्य निवर्तिता १

ने ीति नेतिनेतीति वीप्सार्थया श्रुत्य देह दीन्मिथ्याद्दष्य त्मात्मीयभ वेन गृहीतानशेषानपोह्य प्रतिषिध्य प्रतिषेधावधिभूत आत्मावशेषितः सत्यस्य स य मित्य दौ किमर्थमित्यत अ ह अविशेषात्मबोधार्थमिति अविशेषश्चास वात्मा चेति तथा तस्य बोधो निर्विशेषचित्सदान दस्वभावाविर्भावस्तदर्थमित्यर्थः पर गर्थेष्वपोहितेषु तदवधित्वेन प्रत्यगर्थ एवावशि यत इति प्रत्यक्तत्त्वबोधार्थमित्युक्त भवति बोधेसति किं स्यात्तदाह तेनेति यन्निब धनो देहादावात्माभिमानः कर्माधिक रहेतु साऽविद्या तेन बोधेन निवर्तिता बाधितेत्यर्थ अतो निमित्ताभावान्नैमित्तिकाभाव इति य येनामतत्त्वज्ञानवतो न कर्मविधिप्रतिपत्तिरिति तप्रति फलवद्विज्ञानजनकत्वाभावात्कमका डस्य तद नीमप्र मा यमिष्टमेव निवृत्ततीव्रक्रोधप्रत्यभिच रविधिशास्त्रवदिति सर्वमनवद्यम् १

ननु निर्विशेष त्म ोधेन सकृद्नि वर्तिताप्यविद्या पुनरुद्भवि यति तत

कर्माधिकारहेतुसंभवात्कर्मविधिः स्य च्छुक्तितत्त्वावगमात्तदज्ञाननिवृ त्तावपि पुनस्तत्र समया तरे रजतभ्रमोदयोपल भ दित्याशङ्क्याह

नि त्त सा कथ भूय प्रसूयेत प्रमा
अ त्ये वि षेऽपि प्रत्यग त्मनि केवले १८

नि त्तेति प्रमाणतो निवृत्ता प्रमाण भिना द धा साऽविद्या भूयः पुन कथ प्रसूयेत जायेत नहि मृता द ध च भार्य पुनः प्रसवायोद्भवति तद्वदित्यर्थः अविद्या तर जायेतेति चेत्तत्र वक्त यं किं निनिमित्तं जायेत निमित्त द्वा नाद्यः अकारणकार्योत्पत्ताव तिप्रसङ्गात् द्वितीये किमात्मा निमित्तमनात्मा वा नाद्य इत्याह असत्येवेति अविशेषे केवले इत्यनयोर्व्याख्यान०य ख्येयम व. यद्वाऽविशेष इत्युक्ते मूर्त्यादिकतिपयविशेषाभावेऽपि विशेषान्तरशङ्का स्य दत उक्तं केवल इति तावत्युक्त एकाकिनोऽप्यात्मनः प्रयत्नादिगु णयोगित्वविशेषशङ्का स्यात्तन्निवृत्तयेऽविशेष इत्युक्तम् तथाचाविशेषे केवले प्रत्यगात्मनि सर्वा तरे परमार्थवस्तुनि साऽविद्य ऽसती एव न सत्तां लभते असहायस्यात्मनः कूटस्थस्य कर्तृत्वानुपपत्ते अविद्या तरसहायाभ्युपगमे चा यो य श्रयोऽनवस्था वा प्रसज्येतेत्यर्थः अपिश देन पक्ष तरं निरस्यते अनात्म यप्यसत्येव साविद्या कार्ये स्यानात्मनोऽविद्य हेतुत्वानुपपत्तेरित्यर्थः शुक्तिकादौ तु रजतादि विक्षेपोपादानांशस्यैव विद्याशक्तिभेदस्य ज्ञानेन निवृत्त्यभ्युपगमात् मूल ज्ञानस्य त न्गन तशक्तिमतो विद्यमानत्वात्तद्वशात्पुनर्भ्रा त्युदयो पपत्तेर्दृष्टा तो विषम इति द्रष्टव्यम् १८

अविद्यायाः पुनरनुद्भवस धनफलमाह

न चेद्भूय प्रसूये कता भो ति ी थम्
द ीति च वि ाने स द्विद्य ऽसह यिका १९

नचेदिति पादत्रयेण सदेव ब्रह्मैवाहमस्मीति विज्ञाने विशिज्ञानेऽपरोक्षानुभवे सति भूयः पश्चान्न चेदविद्या प्रसूयेतेति कर्ता भोक्तेति धी कर्माधिकारनिमित्तभूता कथं स्यान्न स्यादेवेत्यर्थः चकार कर्तृत्वादेः पारमार्थिकत्वशङ्कानिवृत्त्यर्थं कर्तृत्वादे पारमार्थिकत्वे विद्य निवर्त्यत्वायोगादनिर्मोक्षप्रसङ्ग इति भावः ज्ञानकर्मसमुच्चय निराकरणमुपसंहरति तस्मादिति यस्माद्विद्य यामुत्पन्नाया कर्म संभवः सिद्धस्तस्मादसहाया केवलैव विद्य कैवल्यहेतुरित्यर्थः १९

विद्याया सहकारिनिरपेक्षत्वेनैव मोक्षहेतुत्वमिति युक्त्योक्तेर्थे श्रौत लिङ्गमुपोद्बलयति

अत्यरेचयदि[illegible] [illegible]ो य श्रुत्यातएव हि
कर्मभ्[illegible]ो मा तेभ् ए दिति व जि [illegible]म् २
अ [illegible]त्व [illegible] स्मा[illegible] [illegible]ज्य कर्म भि

अत्यरेचयदिति तैत्तिरीयोपनिषत्सु सत्यं पर पर सत्य मित्यु पक्रम्य सत्य तप अ दिम नसा तानि कर्माणि श्रेयःसाधन वेन नि र्दि य तानि वा एता यवराणि तपांसी ति ते i फल्गुफलत्वेन निन्दा मभिधाय यास इति ब्रह्मेत्युक्तो यास एवात्यरेचय दिति तत्त्व ज्ञाना तरङ्गभूत सं यासः स्तूयते तस्मान्निन्दितस्यानुपादेयत्वा त्स्तुतस्य चोपादेयत्व त्कर्मस पेक्षत्वे मोक्षस्य सं यासविधानानुपपत्ते सस यासमात्मज्ञानमेव मोक्षसाधनं ग यत इत्यर्थः अतएव हीति ज्ञानस्य फले कर्मनिरपेक्षत्वादेवेत्यर्थः लिङ्ग तरमाह ए व दिति वाजिनाममृतत्व श्रुतमिति वाजसनेयिनामुपनिषत्सु अ त्म नि खल्वरे दृष्टे श्रुते मते विज्ञात इद सर्वं विदित मित्युपक्र य द्वय मात्मतत्त्व दुन्दुभ्यादिदृष्टान्तप्रब धेनोपपाद्य उक्त नुशासनासि मैत्रे

येतावदरे खल्वमृतत्व मिति ज्ञानस्यैवामृतत्वसाधनत्वावधारण श्रुत तस्य कर्मानपेक्षायां लिङ्गमन्यथैतावदित्यवधारणार्थवचनानुपपत्तेरित्य र्थ. अमृतत्वस्य तु नाशोऽस्ति वित्तेने ति च तत्रोक्तो वित्तसाध्यस्य कर्मणोऽमृतत्वसाधनत्वाभावे लिङ्गमनुसंधेयम् नच विद्यां च विद्य चे ति समुच्चयविधानविरोधः तस्य देवतोपासनज्ञानकर्मसमुच्चयविष यत्वात् अ यथा हिर मयेन पात्रेण अग्ने नय सुपथे ति च मार्ग याचनाद्यनुपपत्तेरिति सर्वमनवद्यम् न कर्मणा न प्रजया धनेन त्य गेनैके अमृतत्वमानशुः त्याग एव हि सर्वेषं मोक्षसाधनमुत्तम म् त्यजेतैव हि तज्ज्ञेयं यक्तुः प्रत्यक् पर पद मित्यादिशास्त्राद्य स त्यागोपलक्षितमात्मज्ञ नमेव मुक्तिसाधनं तस्मादिति प्रकृतार्थ मुपसंहरति तस्मात्त्याज्यं कर्म मुमुक्षुभिः साधनचतुष्टयसंपन्नैर त्म तत्त्वजिज्ञ सुभिरित्यर्थः विविदिषोरपि नास्ति कर्मावसर कुतो विदुष इत्यभिप्राय २

अत्रार्धश्लोकोऽधिकः प्रागुक्ताधिकार्थेन सख्येयः तदेव मुमुक्षु णा सर्वकर्मसं यासपूर्वकज्ञाननिष्ठेन भवितव्यमिति य येनोपपाद्ये द नीं परोक्तदृष्टा तमनूद्य दूषयति

अग्निष्टो वदि तत्रेद मिधीयते २१

अ ष्टोमवदिति अर्धश्लोकेन २१

दूषणमुच्यत इति प्रतिज्ञाय श्लोकेन दूषणमाह

नैक र ाध्यत्वात्फ ा यत्व मे
विद्या द्वि री ो द ा ो वि मो भवेत् २२

नै ति कर्मणोऽग्निष्टोम देरनेककारकसाध्यत्वान्नियतद्रव्यमन्त्रत न्त्रप्रयोगसाध्य वादितियावत् तथा फल यत्वात्फलभेदवत्त्वात् यदेव

विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तर भवती तिश्रुते र्विद्याद्वारा चार्यवत्तरफलविशेषसंभवाच्च युक्ता सहकार्यपेक्षेत्यर्थः नैवं विद्याया इत्याह विद्येति तद्विपरीता कर्मस्वभ वविपरीतस्वभावेति यावत् यथा वस्त्वधीनप्रमाणनिब धनाया निरतिशयमोक्षैकफलाय विद्या या न सहकार्यपेक्षा युक्तेत्यर्थः यतएवं स्वभावभेदः कर्मविद्ययोर तोऽग्निष्टोमन्ष्टा तो विषमो दार्ष्टान्तिकाननुरूपो भवेदित्यर्थः २२

वैषम्यमेवोपप दयति

कृष्यादिवत्फलार्थत्वाद् यकर्मोपबृहणम्
अग्निष्टोमस्त्वपेक्षेत विद्या य त्कमपेक्षते २३

कृ या दिवदिति अग्निष्टोमः सातिशयः स यफलार्थत्वाद य कर्मोपबृंह ाम यैः कर्मभिः सहकारिभिर्विहितोद्गीथाद्यङ्गसंश्रितोपासना दिरूपैरुपचयमपेक्षेतेति योजना तत्र दृष्टा तः कृष्य दिवदिति कृषि वाणिज्या ौ फलोपचयार्थं साधनविशेषोपचय प्रसिद्ध इत्यर्थः विद्या तु निरतिशयफलत्वात यत्सहकारिभूतं किं वस्त्वपेक्षते न किमपीत्यर्थः २३

यदुक्तमकुर्वन्विहित कर्मेति प्रत्यवायस्मृतेश्चेति तत्राह—

प्रत्यव यस्तु तस्यैव यस्य हकार इ यते
अहक रफ र्थित्वे विद्येते नात्मवेदिन २४

त्यवायस्ि ति अस्य कर्मणोऽह कर्ता एतत्कृत्वेद फल भोक्ष्य इति यस्याहकार इ यते इष्टो भवति स्वाभाविको वर्तेत इति यावत् तस्याधिकृतस्य विहिताकरणे प्रत्यवायो भवदित्यर्थः अ त्मवेदिन आत्मतत्त्वज्ञाननिष्ठस्य तु अहंकारफल र्थित्वेन विद्येते विषयाभावादतो निमित्ताभावान्न प्रत्यव यस्तस्येत्यर्थः २४

विद्यैवाज्ञानहानाय न कर्मप्रतिकूलत इत्युपक्रम्येयता ग्र थेन कर्मणः स्वातन्त्र्येण वा ज्ञानसहकारितया वा सर्वथा न साक्षा मोक्ष हेतुत्वमस्तीत्युपपाद्य ब्रह्मविद्यामथेदानीं वक्तुं वेदः प्रचक्रम इति परमप्रकृतमुपसंहरति

तस्मादज्ञ नहानाय सस रविनिवृत्तये
विद्याविधानाय प्रार धोपनिषत्त्वियम्   २५

तस्मादिति विद्यायाः कर्मनिरपेक्षत्वं तच्छ दार्थः अज्ञान हानायानाद्यज्ञाननिरासिसिद्ध्येऽपेक्षितब्र विद्या विधातुं संपादयितुमयं परोपनिषद्वेदा तभागः प्रार ध इति योजना अज्ञानहानस्य विशेषणं संसारविनिवृत्तय इति संसारस्य विनिवृत्तिः सम्यङ्निवृत्तिर्यस्मादिति विग्रहः अक्लीबत्वमार्षम् अत्रोपनिषच्छ द्रो लक्षणया वेदान्तग्र थेषु प्रयुक्तः २५

तर्हि कोऽस्य मुख्योऽर्थ इति विवक्षाया ब्रह्म विद्य ख्यं श दसा मर्थ्यं दर्शयन्नुपनिपच्छ दव्युत्पादनेनापि स्वतन्त्रैव विद्या मोक्षहेतुरिति सूचयति

देरुपनिपूर्वस्य वि पि चोपनिषद्भ ेत्
दीकर भ वाच्च गर्भादे श तनात्तथा   २६

सदेरिति षद्लृ विशरणगत्यवसादनेषु इति धातोरुपनीत्युप सर्गद्वयपूर्वकस्य क्विप्प्रत्यया तस्योपनिषदिति रूपम् अस्यात्र ध त्वर्थ त्रयम् तथाहि ये म दब्र विदस्तेषां गर्भज मजरादिकमुपनिषदयति शि थिलीकरोतीत्युपनिषदित्येकोऽर्थः जिज्ञासोश्चोपसमीपे नि निश्चयेन ब्र गमयतीति द्वितीय तत्त्वविद ं तु गर्भादि नाशयत्येवेति

तृतीयः एवं स य ध त्वर्थयोगाद्विद्यैवोपनिषच्छ द्वाच्या तादर्थ्या द्ग्रन्थोऽप्युपनिषदुच्यते लाङ्गलं जीवनमितिवदित्यर्थः २६ .

इति प्रथममुपोद्घातप्रकरणम्

तिषेध रणम् २

तदेवं मुमुक्षोर्मोक्षसाधनब्रह्मात्मविद्याप्रतिपत्तये वेद तारम्भ उपपद्यते इतिस्थिते पुनराशङ्क्यते ननु विद्योपदेशाय वेदा तारम्भस्तदोपपद्यते यदि विद्योदयः संभाव्येत स इहात्मनि संसारित्वग्राहकप्रत्यक्षादिविरोधाद्वाक्यशतेनापि नोत्पादयितुं शक्यते, असंजातविरोधितया प्रत्यक्षादेबलवत्त्वात्तदुपजीविनश्च गमस्य दुर्बलत्वात्कथंचिदुत्पन्नापि विद्या यदि प्रमाणसिद्धं संसारं बाधेत तर्हि प्रत्यगात्मनोऽपि ब्रह्मरूपत्वं कथं प्रत्यक्षानुभवो न बधेतेति अत उत्तरं वदति

प्रतिषेद्धुमशक्यत्वा तिनेतीति शेषि म्
इद न हमिद न हमित्यद्ध तिपद्यते १

प्र ति द्धुमित्या दि नेतिनेतीति वीप्सया सकलदृश्यप्रतिषेधे शेषितमुर्वरित यदात्मतत्त्वं तत्प्रतिषेधावधित्वेन प्रतिषेद्धुः स्वरूपत्वेन प्रतिषेधसाक्षितयाऽवस्थित यतोऽतः प्रतिषेद्धुमशक्यत्व दद्ध साक्षात्प्रतिपद्यते निःसंदि धमुपलभ्यत इति योजना उपल भप्रकारमभिनयति इदमिति इदं देहरूपं नाहम त्मा इदमिन्द्रियजात मनोबुद्धिप्राणतदुपादानचेतनपर्यं तं नाहं किंत्वेषां प्रकाशकमव्यभिचरि स्वयंप्रकाशं कूटस्थमक्षर यस्मिन्सर्वं जगदाश्रयेऽव्याकृताकाश

१ चैत यप्रकरणमिति टीका तरे पाठः

ओतश्च प्रोतश्च तदेव ह परमक्षरमिति प्रतिपद्यत इत्यर्थ. नेन विद्या नोदेतीत्येषा शङ्का निराकृता प्रतिषेद्धुमशक्यत्वादित्यनेन तु यथ व्याख्यातेन बाध यो यत्वं दर्शितमिति विवेक्त यम् १

न वहं ब्रह्मेति ज्ञानमुक्तविधयोत्पन्नमपि न प्रतिष्ठां लभते देहेन्द्रियाद्यभिमानस्यानवरतमनुवृत्तेरित्याशङ्क्य तस्य प्रमाणमूलत्वाभावाद्बाधितानुवृत्तिमात्रस्याभासत्वान्न विद्याप्रतिपक्षत्वमित्यभिप्रेत्य वाक्योत्थज्ञानस्य प्राबल्यमुपपादयति

अहधीरिद ोत्था चार भणगोचरा
निषिद्धात्मोद्भवत्वात्सा न पुनर्मानता व्रजेत् २

अहधीरिति देहादावनात्म यात्मबुद्धिरहंधीरित्युच्यते स हं कर्तुरिदमंशात्पूर्वपूर्वाहकारवासनावासिता त करणरूपादिदम त्मनः सक शादुत्थिताध्यासात्मिकेत्यर्थः स्वरूपतोऽस्या दौर्बल्यमुक्त्व विषयभेदादपि तदाह वाचार भणगोचरेति निरूप्यम ण स्वतः सत्ताहीनमपि यदपरोक्षव्यवहारगोचरतया गम्यते तद्वाचार भणमनृत जडानात्मरूप तदेव गोचरो विषयो यस्याः सा तथा यत एवमतो नेतिनेतीति शास्त्रेण निषिद्धो बाधित आत्मा स्वरूपमुद्भवः कारणं यस्याः सा निषिद्धात्मोद्भवा तस्या भावो निषिद्धात्मोद्भवत्वं तस्म दिति विग्रहः सा पुनरिदंधीरात्मयाथात्म्यज्ञानान तर मानतां प्रमाणत्वं न व्रजेन्न लभेत अवस्तुत्वादवस्तुजत्वादवस्तुविषय वाच्च स्वप्नावस्थाविशेषज्ञानवदि र्थ अतो वा योत्थज्ञानमेव प्रबलं नेतरदिति भावः २

इदानीं पौ र्वापर्ये पूर्वदौबल्य प्रकृतिवदिति यायेन प्रथमोत्पन्नाया

अपि कर्ता भोक्तृत्यादिधिय उत्तरेण ब्रह्मात्मज्ञानेन बाध्यत्वमुपपादयति—

पूर्वबुद्धिमबाधित्वा नो र जायते मति
शिरेक स्वय सिद्ध फलत्व त्स न बाध्यते ३

पूर्वबुद्धिमिति न शुक्त्यज्ञानज यां रजतबुद्धिमबाधित्वा शुक्तिधीरुत्तरोत्पद्यते एवं कर्त्रादिबुद्धिमबाधित्वा नात्मतत्त्वज्ञानमुत्तरमुत्पद्यते अत' प्रसक्तनिषेधात्मकत्वाद्बाधस्य पूर्वसमये उत्तरप्रसक्त्यभावान्न पूर्वेणोत्तरस्य बाधः किंतु परेण पूर्वस्य प्रसक्तस्य बाध इत्यनवद्यम् पदार्थबोधे श दस्य माना तरस पेक्षत्वेऽपि न वाक्यार्थबोधे तदपेक्षा पदार्थबोधेऽपि यवह रमात्रस्यैवापेक्षत्वात्पूर्वबुद्धेर्व्यवहाराङ्गत्वांशस्योत्तरेण त्मज्ञानेनाबाधनाच्च नोपजी यविरोधश्चेति द्रष्ट यम् किंचौ पनिषद त्मज्ञ नमेव तत्त्वावेदकमत्य ताबाध्याथत्वादित्याह चशिरिति ब्रह्मात्माकारा तःकरणवृत्तिप्रतिफलितापरोक्षस्फूर्तिर्धीशिरित्युच्यते सचैकः पराभावेनोपलक्षितोऽद्वितीय इति यावत् स्वयंसिद्धः परनिरपेक्षसत्तास्फूर्तिकः स न बाध्यते उक्तैर्विशेषणैर्बाधायो यत्वावगमात्फलत्वात् नहि फल बाध्यते तस्य सर्वज्ञानसाधारणत्वात्सर्वव्यवहारहेतुप्रकाशत्वाच्चेत्यर्थः नित्यसिद्धस्या यस्य फलत्वं विषयाकारवृत्ति यक्तत्व पेक्षयोपचर्यत इति भावः ३

एवं ब्र ात्मज्ञानस्य वाक्यादनुत्पत्तिशङ्कामुत्प स्य प्राबल्योपपदनेन पूर्वप्रवृत्तप्रत्यक्षादिभिर्बाध्यार्थत्वशङ्कां चोन्मथ्येद नीं कथमिदमुत्पद्यतामिति वीक्षायां पदार्थपरिशोधनेनेति श्रौतन्दष्टा तेनोपपादयति

इद ति क शो गो ादिदूषि म्

न द्र ध रको यद्वत्स्व त्मान प्रतिपद्य ॥ ४ ॥

इद वनमिति इदं शरीरमेव वनमिव वन रागद्वेषशोकमोहादिभि र्याघ्रतस्करादिस्थानीयैर्दूषितमाक्रा तमतिक्र य दिङ्मात्रमाचार्यादवगम्या वयव्यतिरेकालोचनया पदार्थशोधनेन देहादिकमनात्मतया त्यक्त्वा स्वमात्मानं सर्वानुस्यूतमनपोह्यं प्रतिपद्यते अहं ब्रह्मासीत्यौपनिषद पुरुषमवगच्छतीत्यर्थः यथा गा धारको ग धारदेशवासी पुरुषो बद्धचक्षुरेव तस्करैरानीय महावने निक्षिप्तः स धमोक्षार्थी तत्र क्रोशं कुर्व केनचित्कारुणिकेनोपल धस्तेन मोचितब धो दर्शितस्वदेशमार्गो ग्र म ग्रामं पृच्छन् पण्डितो मेधावी वनात्स्वदेशं प्रतिपद्यते तथायमपि संसारी अविद्याराग दितस्करैर्मिथ्याज्ञानपटेन विवेकदृष्टिमाच्छाद्य स्वदेशाद्देहार यं प्रवेशितो ब धमोक्षार्थं कदाचित्केनचित्कारुणिकेनाचार्येण ब्रह्मविदा त्याजितमिथ्यादृष्टिपटः प्रतिबोधितस्वदेशब्र मार्गोऽ वय यतिरेकाभ्यां स्वयमूहमानः स्वमात्म नमधिगच्छतीत्यर्थः ॥ ४ ॥

इति द्वितीयं आत्म ज्ञानोत्पत्तिवि धिप्रकरणम् ॥ २ ॥

ईश्वर प्रकरणम् ३

येय ब्रह्मविद्या प्रतिपादिता तस्या प्रक शमानं ब्रह्म किं प्रत्यगात्मनो भेदेन प्रत्येत यं तदभेदेन वेति द्वा सुपर्णा सयुजे त्यत्र भेदश्रवणात् अयमात्मा ब्रह्मे त्यभेदश्र णाच्च संदेहे निर्णयकारणं श्रौतं दर्शय ाक्यविषयमर्थं स्पष्टयति

ईश्वरश्चेद (न्न गीति ध र त्
अ (ाचेदीश्वरोऽ गीतिवि स नि ा १

ति धा रणमित्यन्यत्र

ईश्वर इत्यादिना ईश्वरो जगत्कारणत्वेनोपलक्षित. परमात्मा सत्यज्ञ नान तान दरूप' स चेदात्मभिन्नो मेर्वादिवद्विपयभूत' परोक्षो वा स्यात्तद सावाश्वरोऽहमसीति मुमुक्षुर्न धारयेदात्मानं तत्त्वतो न प्रतिपद्येत ततस्तत्त्वमस्यादिवचनविरोधः स्यात् आत्मेति रूप गच्छन्ति ग्राहयन्ति चे ति य यविरोधश्च स्यादित्यर्थः ईश्वर एवा त्माहमस्मि ना य इति चेद्धारयेद्विजानीयात्तदा न श्रुति यायविरोध इति योऽयम् सा विद्या तिरोहितभेदाकारप्रत्य ब्रह्मैक्यावलम्बिनी अ यस्या अविद्याया निवर्तिका समूलसंसारनिवर्तिकेत्यर्थ' ब्र वेद ब्रह्मै भवति ब्रह्मैव सन्ब्र ाप्येती त्यादिश्रुतौ ब्रह्मज्ञानस्य ब्र भावफलश्रवणाद यत्वपक्षे स्थितस्य नष्टस्य वान्यस्या यभावानुप पत्तेरैक्यज्ञानमेव फलवदिति तत्रैव शास्त्रतात्पर्यं न भेदे तज्ज्ञान स्याफलत्वात् अन्योऽसावन्योऽहमसीति न स वेदे ति भेददर्शनस्य निं दितत्वा भेदश्रतेस्त्वनाद्यविद्याकल्पितभेदानुवादपरत्व न्न स्वार्थे तात्पर्यमिति भ वः १

इतश्चाभेदे वेदतात्पर्यमाह

आत्मनोऽ चेद्धर्म अस्थूल दयो ।
अज्ञेय ऽ किं तै दा त्वे यधीहृति २

अ न इति अस्थूलत्वादयो धर्माः प्रत्यगात्मनोऽ यस्य भिन्नस्येश्वरस्य चेन्मता इष्टाः स्युस्तदास्येश्वरस्यानात्मभूतत्वादज्ञेयत्वे ति मुमुक्षोरस्थूलत्व दिभि. श्रौतैर्धर्मै' किं स्यान्न किमपि स्थूलोऽह शोऽहमित्य दिस्वगतभ्र त्यनिवृत्तेरित्यर्थ यद त्वस्थूलत्वादिधर्मक ईश्वरोऽहमसीति ज्ञ यते तदा तस्याप्यात्म सति प्रतीचोऽ यधीहृति स्वात्म येव गृहीताया कृशस्थूलत्वादिधियो मोहमूलाया बाधसिद्धि फल स्य दित्यर्थ' २

कस्मिन्नाकाश ओतश्च प्रोतश्चे ति कार्यकारणात्मकजगदाश्र यप्रश्नोत्तरत्वेनाक्षरस्योपक्रमात् एतस्य वा अक्षरस्य प्रशासने गागि इति जगदीश्वरतया मध्ये परामर्शात् अदृष्टं द्रष्टृ त्यादिना तत्स्वभा वकथनपूवकम ते च एतस्मिन्नु खल्वक्षरे गा याकाश ओतश्च प्रोत श्चे त्युपसंहारादीश्वरपरता ब्रा णवाक्यस्याशेषस्यावधारित तत्र नान्यदतोऽस्ति द्रष्टृश्रोतृम तृविज्ञातृ ति द्रष्टृत्वाद्युपलक्षितस्य प्रत्यगा मनोऽक्षरब्रह्माभेदश्चावधारित इतश्वरात्मनोरभेद एव शास्त्रार्थो यतस्तस्मात्प्रत्यगात्म यध्यस्तस्थूलत्वादिप्रतिषेधपरमिद वाक्यमास्थेय मित्यभिप्रेत्याह

मिथ्याध्य निषेधार्थ तोऽस्थूल दि गृ त म्
रत्र चेन्नि पेधार्थ शू यता न हि तत् ३

मि थ्येति ततस्तस्मान्मिथ्याध्य साज्ञानमूलस्य निषेध र्थ निवृ त्त्यर्थ अस्थूलादिप्रत्यगात्मविशेषणत्वेन गृह्यताम् विपक्षे दोषमाह रत्रेति अस्थूलादिव क्यं परत्र प्रत्यगात्मनोऽ यत्र स्थूलत्व निषेध र्थ चेत्स्यात्तदा हि निश्चितं शू यतावर्णनमेव तत्स्याद त्मनो ऽ यस्य जडत्व त्तस्य च स्थौल्यादिधर्मयोगान्निषेध त:पातित्वे सतीश्व रस्येश्वरत्वायोगान्निषेधमात्रपरमेव वाक्य स्यादित्यर्थः तस्मादस्थूला दिधर्मकस्य नात्मत्वायोगादीश्वरमभ्युपगच्छतात्मैव सोऽभ्युपग त य इति भाव ३

किंच प्रत्यगात्मनोऽ यत्र स्थूलत्वादिप्रतिषेधे चाप्र सप्रतिषेधो नि फलश्चापद्येतेति दोष तरमाह

भुत्सोयदि च त्यग त्मन इ यते
ो मन भ्र इति च च ४

बु त्सो र ति यदि प्रत्यगात्मनो बुभुत्सोरात्मतत्त्वं बोद्धुमिच्छो ससारित्वेनाभिमतादात्मन इतियावत् तद यत्र देहेन्द्रियप्राणमनस्त द्धर्मनिषेध इ यते तदाऽप्राण इत्यादिवचनमनर्थकं निविषयं स्याद यत्र प्राण दिप्रसक्त्यभावात्प्रतिषेधस्य च दृष्टार्थत्वादित्यर्थ· ४

इति तृतीयं ईश्वरात्मप्रकरणम् ३

तत्त्व ान भा प्र रणम् ४

ननु यदिदमीश्वराभेदेनात्मनो ज्ञानं मोक्षसाधनमुक्तं तन्नोपपद्यते सचितानेककर्मसद्भावात्कर्मणां च फलावश्यंभावनियमात्तैः प्रतिबन्ध ंभव दिति तत्राह

अह त्य बीज दह य ति म्
नाह त्यय ह कथ कर्म रोहति १

अह त्ययेति अहमिति प्रत्ययोऽहंकारोऽनात्म यात्माभिम न लक्षण स बीजं कारणं यस्य कर्मणस्तदहंप्रत्ययबीज अहमिति प्रती यते अ त्मा यस्मिन्न तःकरणे साभ से तदहंप्रत्ययवत्तस्मिन्नहंप्रत्ययवति स्थितं सचितं यत्कर्मजातं तन्न हं कर्ता भोक्ता किंतु ब्रह्मैवाहमस्मीति य प्रमाणजनित प्रत्यय· स एव वह्निस्तेनो द धं कथं पुनः प्ररो हति फलो मुखं जायेतेति योजना तथाच श्रुतिस्मृती क्षीयन्ते चास्य कर्माणि तस्मि दृष्टे परावरे ज्ञ नाग्निः र्वकर्माणि भस्मसा त्कुरुते तथे ति ज्ञानोदये ना तरायकतया मूलाज्ञानस्य विरोधादेव निवृत्तिसंभवात्तदा तत्कार्या त·करणस्यापि निवृत्तेराश्रयाभावे कर्मस्थि त्ययोगात्कुतस्तेन मोक्षप्रतिब धशङ्केत्यभिप्राय·

ननु यथा ज्ञ नवतोऽपि भिक्षाटनादिकर्म सफलमुपलभ्यते तथ तस्मादृष्टफलमपि कर्म सफल स्यादिति कल्प्यत इति शङ्कते

इ ेत्प्ररोह स्या ा यकर्मा स इ य े
ि रोधे कथ तत्स्य त्पृ ाम्ो वस्तदु यताम् २

इ व ेत्प्ररोह स्यादि ति परिहरति ना यकर्मा स इ यत इति नेति निषेध र्थः स भिक्षाटनादिविदुषो व्याप रोऽ यकर्मा अ यत्र प्रवृत्तं फलं कर्म कारणं यस्य सोऽ यकर्मा स इ यते ज्ञानाविरोधिप्रार धफलकर्मनिब धनं हि भिक्षाटनादि नैव विधलक्षणं तस्य ज्ञानविरोधित्वादित्यर्थः ननु ज्ञानादज्ञाननिवृत्त्या त मूलाहंकारनिवृत्तिद्वारेण तद श्रयकर्मनिवृत्तौ कथमार धमपि कर्म सिद्ध्येद्यन्निमित्त विदुषो भिक्षाटनादिकर्मप्रवृत्तिरिति पृच्छति पूर्ववादी तन्निरोध इति कर्माश्रयः प्रथमतच्छ दार्थः कर्म द्वितीयतच्छ दार्थः २

उत्तरमाह

देह र भस म य ज्ञ न द्विषय त्वयि
अभिभूय फल कुर्या ि े न द्भवेत् ३

देह दीति सद्विषय प्रमाणजनितत्वेन प्रबलमपि ब्रह्म त्मविषयं ज्ञ नमभिभूय विदेहकैवल्यरूप त्फलात्प्रच्याव्य कर्म प्रार धफललक्षणं स्वफल देहाभासजगदाभासरूपं त्वयि ज्ञ नवत्यपि कुर्या देव कुतः देहाद्यारम्भंप्रति समर्थत्वाद ते प्र र धकर्मफलभोगवसाने सति ज्ञानं प्रतिब धरहित समुद्भवेदुद्भूतं भवति वर्तमानकार्यसंपादकाविद्यालेशमप्यपब ध्य विद्वांसं स्वाराज्ये स्थापयेदित्यर्थः ३

ननु प्रार धकर्मवशाज्ज्ञ निनोऽपि भोगः स्या त्वनार धकर्मतत्फलयोस्तस्मिन्नवस्थितिरिति कथमुपपद्येत अज्ञानक र्यत्वाविशेष त्सर्वस्या ज्ञाननिवृत्तौ च पुनराश्रय भावेन वस्थ नाभावस्य समत्वादित्य शङ्क्य विशेषमाह

आर धस्य फ ते भोगो ज्ञ न च कर्मण
अविरोध योर्यु ो वैध र्य चे रस्य तु ४

आर धस्यो भोगो ज्ञानं चेत्येते हि यस्मादार धस्य कर्मणः फलेऽतस्तयोरविरोधो युक्त इतरस्य त्वनार धफलस्य संचितस्य क्रियम णस्य वा कर्मणो वैधर्म्यं वैपरीत्य विरोध एवेत्यक्षरार्थः अयंभावः ज्ञ न हि स्वकारण ज्जायमानं शरीरादिसापेक्षमेव जायते अशरीरस्याग तुकज्ञानासंभवात् शरीरादिकं तु न ज्ञानकारणादुत्प द्यते अन्यक रणस्या यहेतुत्वायोगात् अतः कैश्चित्कर्मविशेषैः शरीरविशेषे ज्ञानोत्पत्तियो ये स्वफलदानायार धे सति तमाश्रित्य ज्ञानहेतुकर्माणि ज्ञानम रभ त इत्यभ्युपगन्त यम् तथाच र धे देहे तद्भोगस्यावश्यंभावित्वाद्भोगप्रदकर्मारब्धशरीरमाश्रि स्वहेतुसमास दितं ज्ञानं स्वफलमज्ञाननिवृ त्तिं कुर्वदपि न सद्यो भोगैकनाश्यदेहारम्भककर्म क्षिप्ताविद्यालेशं निवर्तयत्युपजी यविरोधित्वाभावादिति न र ध फलकर्मज्ञ नयोर्विरोधोऽनार धफलानां तु कर्मणामकर्त्रात्मतत्त्वज्ञानोदयविरोधादेव कर्तृस्वभावनिवृत्तावाश्रय भावादभावोपपत्तेर्न ज्ञानसहावस्थानमुपपद्यत इत्यस्ति विशेष इति ४

ननु ज्ञ निनोऽपि चेद्भोगो देहार भककर्मनिब धनोऽस्ति तर्हि तस्य कद चिद्देहात्माभिमानसंभव स्तदुद्भूतदुरितप्रतिबन्धवशान्मोक्षानुपपत्तिरिति चेन्नेत्याह

देहा ज्ञान देह न ध म्
अ भ स्य पि मुच्यते
वमि द रि द्ध योगोऽ भिरीरित ५

देह त्मज्ञानवदिति यथा विवेकविलक्षणस्य लौकिकस्य देहे मनु योऽहमित्यात्मज्ञानं निःसंदि धमुपल धं तथा मुख्यात्म येव देहाद्यहकारपर्य तसाक्षि यात्म येव यस्य देहात्मज्ञानब धकमहमस्मि परं ब्र ेत्येवंरूपं निःसंदि धं ज्ञानं भवेत्स यथोक्तज्ञानवलाद्नर्थर शेरपनीतत्वा मुक्तिमनिच्छन्नपि बल मुच्यत एवेत्यर्थः तथाचा विर्भूत त्मतत्त्वस्य पुनर्देह भिमानहेत्वभावान्न मोक्षे कोऽपि प्रतिब ध इति भावः तथाच श्रुतिः भिद्यते हृदयग्रन्थिश्छिद्य ते सर्वसं शयाः क्षीय ते चास्य कर्म णि तस्मि दृष्टे परावरे इत्याद्या तथा स्मृतयोऽपि बीजान्य युपद धानि न रोह ति यथ पुन ज्ञान द धैस्तथा क्लेशैर्न त्मा संब ्यते पुनः यथा पर्वतमादीप्तं नाश्रयन्ति मृगद्विजाः तद्वद्ब्रह्मविदो दोपा नाश्रय ते कदाचन मन्त्रौ षधबले र्यद्वज्जीर्यते भक्षितं विषम् तद्व सर्वाणि कर्माणि जीर्य ते ज्ञानिनः क्षणा दिति ज्ञानिनः कर्मणा प्रतिब धाभावमुपपादितमुपसंहरति

तत इत्यर्धश्लोकन सर्वमिदमिति प्रारब्धकर्माविरोधित्वोक्तिः सिद्धं श्रुत्यादिप्रम णसिद्धमित्यर्थः प्रयोग उपपत्तिः ५

इति चतुर्थ तत्त्वज्ञ नस्वभावप्रकरणम् ४

बुद्ध्यपराध रणम् ५

यदि प्र गुक्तरीत्या ब्रह्मात्मज्ञानममृतत्वं गमयेत्किमिति तर्हि सर्वै रहंब्रह्मास्मीत्यात्मरूपं न गृह्यते निस ्त एव सर्वेषां परमपुरुषार्था र्थित्वादित तत्राह

मूत्र शङ्को यथोदङ्को हीदमृत यथा
कर्मन शभ ज ोर त्मज्ञाना ह था १

---

१ इत्यहंप्रत्ययप्रकरणमित्य त्र

मूत्राशङ्क इति अत्रेयमाख्यायिक उदङ्को नाम कश्चिद्दषिर्भगव तं महावि णुं तपसा तोपयित्वा देवरक्षितममृतं प्रार्थितव न् तदा भ ावता देवे द्रंप्रत्युक्तममृतमस्मै दीयतामिति इ द्रस्तु विष्णो राज्ञां प लयन्नमृतकलशं नीत्वा मातङ्गवेपमास्थाय स्वबस्तिदेशे कल शमुपनिधायोदङ्काय दातुमारेभेऽसूयया माभवत्त्वस्यामृतपानमिति म यमानः तदुदङ्कोऽपि च डालमूत्रशङ्कया न जग्र हेति उदङ्को मूत्रा शङ्कः सन् यथाभूतमेव प्रत्यक्षोपल धमप्यमृतं यथा नाग्रहीन्न मदभि ल पितममृतमिदमिति न गृहीतवान् जातिनाशभयादिति योजना तथा ज तोर्लेकस्य वर्णाश्रमोपाधिविहितकर्मनाशभयादात्मज्ञानस्य यथोक्तस्याऽग्रहस्तस्मिन्ननादर इत्युत्तरार्धयोजना पदार्थस्वरूपापरिज्ञान विपरीतज्ञानं च श्रुत्युक्तात्मस्वरूपाग्रहणकारणमिति भावः १

ननु दृष्टा ते देवे द्रस्य वेप यत्वममृतकलशस्य च मूत्राशयस्थान निवेशनं च जात्य तरमूत्रभ्रमोत्पादनेनामृताग्रहणकारणमासीन्न तथा त्मनो ब्रह्मभूतस्य भ्रमक रणमस्तीत्यत आह

बुद्धिस्थश्चलतीवात्मा ध्य यतीव च दृश्यते
नौग स्य यथा वृक्षा द्वत्संसारविभ्रम २

बुद्धिस्थ इति ऽनाद्यविद्यया स्वात्म यध्यस्तबुद्धौ लिङ्गशरीरे अभिमानित्वेन स्थित आत्मा तस्यां बुद्धौ चल त्यां चलतीव दृश्यते न वस्तुतश्चलत्यविक्रियत्वात्तथा तस्यां ध्याय त्यां निश्चलीभूताया ध्यायताव निश्चल इव दृश्यते प्रतिभासते न वस्तुतो ध्यायति चल नाभावे तत्प्रतियोगिकस्य नैश्चल्यस्याप्यभाव दित्यर्थ विकारवद्बु द्ध्यविवेकादादावेव संसार्यहमस्मीति विपरीतनिश्चयदोषाच्छ्रुत्यादिभि रीर्यमाणमप्य त्मनो ब्र त्व न गृह्णाति लोक त्यभिप्र यः अविवे

काद् यथ प्रतिपत्तौ ~ । तमाह नौगतस्येति तद्वदिति दार्ष्टन्तिकोक्तिः २

उक्तमेव प्रपञ्चयति

नौस्थस्य प्रातिलोम्येन नग ना गमन यथा
आत्मन ससृतिस्तद्वद्ध्यायतीवेति हि श्रुति ३

नौस्थस्येति जलस्थायां चल त्यां न वि स्थितस्य जनस्य यथा नौगतिदि वैपरीत्येन जलाशयतीरस्थानां नगानां वृक्षादीनां गमनं विभा यते उपाध्यविवेकात् तद्वदसंसारिणोऽप्यात्मनः संसृतिरनुभूयत इत्यर्थः उक्तार्थानुवादिनीं श्रुतिं पठति ध्य यतीवेति हि श्रुतिरिति 'स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीवेति श्रूयत इत्यर्थः ३

प्रपञ्चितदृष्टा तानुगु येन दार्ष्टा तिकं प्रपञ्चयन्नुदाहृतश्रुत्यर्थमाह

चैत यप्रातिबिम्बेन यासो बोधो हि जायते
बुद्धे श दादिभिर्भासस्तेन मोमुह्यते जगत् ४

चैत यप्रबिम्बेनेति चैत यप्रतिबि बश्चिदाभासस्तेन व्यासो हि यस्माद्बुद्धेर्बोधो विषयाकारा बुद्धिर्जायते अत स्वाभासाविवेका ~छ दादिभिर्बुद्धिवृत्तिव्यासविषयैः इत्थंभावे तृतीया विषयभूत देहाद्यात्मना भासो भासन स्फुरणम त्मनो भवतीति शेष' यदि श दादिनिर्भास इति पाठो लभ्यते तदा बोधविशेषणम् श दादे र्विषयस्य निर्भासो यस्मिंस्तथेति सुगमम् येनैवमेकस्यां बुद्धिवृत्तौ देहादिविषयचैतन्ययो सश्लेष इव भवति तेनान्यो याविवे निमित्तेन जगज्जनोऽतिशयेन तीत्यर्थः य । नौस्थ पुरुषो न वश्चलनं न नुभ ति अचलत्सु च वृक्षेषु चलनमनुभवतीत्युपाधिसामर्थ्यादेव

बुद्धिस्थदेहाद्यात्मभावमिवापन्न आत्मा तदीय याप र न पृथगनुभवति तदाभासाविवेकात्तु चिद त्मनि विकारमारोपयन्ननुभवति मृषैवेत्येत द्ध्य यतीवेत्यादिश्रुत्योच्यते अत उपाधिसामर्थ्यात्संसारित्वविभ्रम इत्यभिप्रायः ४

एवमविवेकाधीने ससाराध्यासे विविक्तपदार्थस्य वाक्यादहंब्रह्मा स्मीति बुद्धिवृत्त्युदये मुक्तिः फलिष्यत्यत. पदार्थविवेकवत भा यं मुमुक्षुणेत्यभिप्रेत्याह

चैत यभास्यता ऽमस्तादर्थ्यं च तदस्य यत्
इदमशप्रह ेन पर सोऽनुभवो भवेत् ५

चैत यभास्यतेति अहमोऽहंकारस्य चिदचिद्ग्रन्थिरूपस्य यच्चैत यभास्यता ऽश्यता यच्च तादर्थ्यं चिदात्मनो विषयोपस्थापकत्वेन तच्छेषत्वमस्ति तदुभयमस्याहंकारस्य संबन्धि तस्मिन्निदमंशस्य प्रहाणे विवेके सति न भवेन्न स्य दि ति योजना तत्र योऽनुभवः साक्षी परिशिष्टः स परः परमात्मा वाक्यार्थभूतो भवेदित्यर्थः **यद्वा** अस्या हमोऽहंकारस्य चैत यभ स्यता जडता तादर्थ्यं च तच्छेषत्व च यद्य स्मादस्ति तत्तस्मादयमहंक रो नात्मेति वेद्यांशप्रहाणेन तस्मिन्नसदर्थ त्वाभिमानत्यागेन योऽनुभव' स पर आत्मेति निश्चयवा भवेदिति योजना **अथवा** स वाक्यार्थविषय' परः सर्वे त्तरोऽनुभवोऽहमोऽहंक र स्येदमशप्रह णेन पृथक्करणेन भवेदिति सब धः इदमनिदम त्मक स्याहकारस्य संब धी य इदमशस्तस्य स क्षिसाक्ष्या वयव्यतिरेकाग मापायितदवध्य वय यतिरेक लोचनरूपेण मननेनापबाधेसति अवशि ष्टांशोऽनपोह्य आत्मेत्यनुभवो भवेदित्यर्थः न वहमित्यवभासे इदमंश एव न चक स्ति यस्य प्रहाणेन परोऽनुभवो भवेदित्याशङ्क याम ह ।

चैत यभास्यतेति ताद र्थं चेति च सुषुप्त्यादावात्मनि भासमा नेऽ यहंकारस्यानवभासादनात्मत्वे निश्चिते सति जागरितादावागन्तु कचैत यभास्यता तस्य सिद्धा अतः प्रतिभ सते ्दमश भावेऽपि चैतन्यभास्यत्वेन लक्षणेनास्तीदमाकारतेत्यर्थः तथा तादर्थ्यम यस्ति अ त्मनि कर्तृत्वभोक्तृत्वादिव्यवहार निर्वाहकतया अ त्मशेषत्वमस्ति य द्यस्मादेवं तत्तस्मादप्यनात्मत्वलक्षण इदमंशो विद्यते अतस्तत्प्रहाणेन ब्रह्मात्मानुभवो भवेदिति सर्वं समञ्जस ९

इति पंचमं बुद्ध्यपराधप्रकरणम् ५

विशेषापोह रणम् ६

पदार्थविवेकवतो वाक्यादहब्रह्मेति ज्ञानं भवतीत्युक्तम् तत्राह 'मित्यत्रेदमंशप्रहाणेन साक्षितत्त्वस्य शोधनप्रकारः सूक्ष्मोपायो निदिष्टः तत्रासमर्थप्रति स्थूलोपायेन पदार्थशोधनप्रकारमुपदेष्टुं प्रकरणमार भते तत्र यत्स्वरूपप्रहाणम तरेण ज्ञातुं न शक्यते यथाग्नेरौष्ण्यं तस्य स्वरूपत्वादेव न विशेषणत यद्यपि तथापि तथाविधस्य क्वचिद्विशेषणत्व यवहार कल्पितभेदमाश्रित्येति स्थिते आत्मनि सति सत्ताचैत यान दानामनपायान्न तेषां विशेषणत्वं किंतु स्वरूप त्वमेव कृश. स्थूल कृष्णो गौरोहं मनु यः श्रोता द्रष्टा वक्ता कामी क्रोधी ज्ञानी कर्ता भोक्ता सुखी दुःखीत्येवंविधानि विशेषणानि नात्मनः सत्त दिवत्स्वरूपभूत नि सत्यप्यात्मनि सुषुप्त्यादौ तेषामभा वादित्येवमात्मनः पृथगुद्धृत्य तस्य कूटस्थतावधेयेत्यभिप्रेत्य पृथग्भू तस्य विशेषणत्व भ वे दृष्टा तमाह

१ मूत्राशङ्कप्रकरणमित्य यत्र

छि.र ा त्यक्तेन हस्तेन स्वय नात्मा विशि यते
तथा शिष्टेन सर्वेण येन येन विशेष्यते १

छित्वा त्यक्तेनेति यथायं न्या तस्तथा येन येन मनुष्यत्वादिना विशेष्यते तेन सर्वेण शिष्टेन त्यक्तहस्तातिरिक्तेन पादादिना वा स्वयमात्मा न विशिष्यते यथा हस्तच्छेदान तरं हस्तवानहमिति न विशिष्टप्रत्ययः क्रियते एवमेव पाद दिमा मनुष्योऽहमित्यादिविशिष्टप्रत्ययो न कार्य इत्यर्थः १

देहद्वयसमवायिधर्माणामात्मनि व्यभिचारत्तेरात्मा विशिष्य न प्रत्येतव्य इत्युक्तमनूद्य फलितमाह

तस्मात्यक्तेन हस्तेन तुल्य सर्व विशेषणम्
अनात्मत्वेन तस्माज्ज्ञो मुक्त सर्वैर्विशेषणै २

तस्मादिति अनात्मत्वेन त्यक्तेन हस्तेनेति संब धः विमतानि विशेषणानि नात्मस्वभावभूतानि विशेषण त्वात् छित्वा त्यक्तहस्तवदित्यर्थः यस्मादेवं तस्मात् ज्ञो ज्ञानवान्विवेकज्ञानवान्सर्वविशेषणैर्मुक्तश्चित्सदानन्दमात्रात्मक एवावशिष्यत इत्यर्थः २

उक्तन्यायेन विशेषणानामनात्मत्वेऽपि नात्मनस्तद्वियोगोऽस्ति आगमापायाभ्यां संब धनैर तर्यादित्याशङ्क्याह

विशेषणमिद सर्व साध्वलकरण यथ
अविद्याध्यासत सर्व ज्ञात आत्म यसद्भवेत् ३

विशेषणमिद सर्वमिति इदं सर्वं विशेषण यथालंकरणमलंकार्यसंबन्धेऽपि न तत्तादात्म्यतद्धर्मत्वबुद्धिविषयस्तथा साधु शोभनं युक्तमिति यावत् इतरथा आगमापायानुपपत्तेरित्यर्थ तर्हि कुतो

मनुष्योऽहमित्यादौ तादात्म्य वभासस्तत्र ह अविद्याध्यासत इति मोहादेव तथ वभास इत्यर्थः यस्मादविद्यय ध्यस्तमेवात्मनीदं सर्वं विशेषणमतो ज्ञाते आत्म यविद्यानिवृत्तावसत् बाधितं कालत्रयेऽप्य विद्यमानं भवेत्तथा निश्चितं भवेदिति योजना २

ज्ञात आत्मनीत्युक्ते ज्ञेयत्वमात्मन उक्तमिति शङ्का स्यात् ज्ञेयत्वे च विशेषणादिवदनात्मत्वप्रसङ्ग इत्याशङ्क्याह

ज्ञातैव त्मा सदा ग्राह्यो ज्ञेय त्सृ य के ल
अहमित्यपि यद्ग्रा यपेताङ्गसम हि तत् ४

ज्ञातैवेति ज्ञेयमुत्सृज्य दृश्यांशापोहं कृत्वा यो ज्ञाता सदा सर्वस्य स एव त्मा न ग्र ह्यांश इति ग्राह्योऽ यवसेयः किंलक्षण. केवलो ज्ञातृत्वविशेषणेनापि रहित इत्यर्थ ज्ञातृत्वाद्युपलक्षितं चि मात्रमलुप्तप्रकाशस्वभावतया सर्वानुस्यूतं वस्त्वात्मेति विवेकवतो निश्चितप्रत्ययो भवेदिति भावः अहमित्यनुभूयमानत्वात्कथं ज्ञातै वात्मेत्युच्यत इत्यतआह अहमित्यपीति यदपि इदमहमिति ग्राह्य मात्मरूपं म यसे तद्व्यपेताङ्गसमं छिन्नहस्ततुल्यं हि एव तत्सुपुत्या दावात्म यवभासमानेऽप्यहमित्यनवभासनादहमो व्यभिचारित्वे सत्या त्मदृश्यतयात्मत्वायोगादित्यर्थः ४

आत्मनोऽहंप्रत्ययग्राह्यत्वाभावे चक्षुरादेरप्यविषयस्य कुत सिद्धि रिति मु धशङ्कं दृष्ट्वा तेनापाकुर्वन्नात्मनोऽ यनिरपेक्षां स्वतःसिद्धि स धयति

यावा स्य दिदम ो य स तोऽ यो वि षणम्
वि क्षयो यत्र सिद्धो श्चित्रगुयथा ५

।व निति अहमित्यत्र यावांश्चिदवभ स्यत्वलक्षणेनेदमशो योऽहंकारादिर्यत्र विशेषणं स्याद्यस्मि स्वानुगतप्रतिभासे प्रत्यगात्मनि विशेष यवहारहेतुः स्यात्स प्रत्यगात्माऽ यो विशेषणत्वेनाभिमतात्तद हक रादेः परो विशेषप्रक्षयश्च सर्वेषां विशेषाणां प्रक्षयो याद्वृत्ति र्यस्मिन्निति युत्पत्तेर्निर्विशेपश्च एवंरूपः स्वतःसिद्धोऽ यनिरपेक्ष एव सिद्धः स्फुर वर्तत इति पदयोजना यथा देवदत्तो विशेपणभूता याश्चित्रगोर यस्तत्संब धात्प्रागेव सिद्धो न चित्रगोः सब धं स्वसिद्धिं प्रत्यपेक्षते तथात्माप्यहकारादिसब धात्प्रागेव स्वमहिम्ना सिद्धो नाहं कारादिकं स्वसिद्धावपेक्षत इति ॑ष्ट तदार्ष्टान्तिकसगतोऽर्थः ५

न वहमोऽनात्मत्वे कथमहं ब्रह्मेति त दात्म्यश्रुतिरुपपद्येतेत्याश ङ्क्याऽ यस्त हंकारस्य मूलनिवृत्त्यर्था श्रुतिर्नाहंक रस्यात्मत्वप्रतिपत्त्य र्थेति परिहरति

इदमशोऽहमित्यत्र त्य ज्यो नात्मेति पण्डितै
अहब्र ेति शि ाशो भूतपूर्वग ेर्भवेत् ६

इदमशोऽह ेमिति अहमित्यत्राहकारावभासे य इदमंशः स नात्मा ॑श्यत्वादिति निश्चित्य पण्डितैस्त्य ज्यः तस्मिन्नात्माभिमानो न कार्य इत्यथः तर्हि कथं श्रुतिनिर्देशस्तत्राह अहमिति अहब्र ह्मेति वाक्य र्थनिष्ठ यां योऽहंकारांश उल्लिख्यते स भूतपूर्वगतेर्हेतो र्भवेत् भूता संजाता पूर्वं गतिः प्राप्तिस्तस्या इति विग्रहः अहंकार लक्ष्यं वस्तु तत्साक्षिरूपमहमिति श्रुत्योल्लिख्यत इत्यर्थः ६

इति ष ं विशेषापोहप्रकरणम् ६

१ इति छिन्न करणमिति वा

ारू र म्

एव कृता य यतिरेकस्य परिशोधितपदार्थतत्त्वस्य वाक्यादेव क्यार्थ ानमुपपद्यत इत्युपपत्त्या निर्धारितमर्थं स्वानुभवा ष्टम्भेन द ीकर्तुं प्रकरणान्तरमारभते -

बुद्ध्य रू द व यते
ा ८ र श्च रि ग १

बुद्ध्य रूढ मित्यादिना यस्म मया सर्वमध्यात्ममधिभूतम धिदैवमित्यादिलक्षणं यत्र तत्र वा जाग्रत्स्वप्नयोरिहलोकपरलोकयोर्वा स्थित प्रत्यक्ष दित. शास्त्रतो वा यदुपलभ्यमस्ति तत्सव बुद्ध्यारूढ बुद्धिवृत्तिक्रोडीकृतं सदा दृश्यते प्रक श्यते तस्मादह सर्वदृश्यविल क्षणत्वात्परं प्रपञ्चातीतं ास्मि सर्वज्ञः सर्वार्थप्रकाशकः सर्वगोऽपरि च्छिन्नश्चास्मीत्यर्थ १

ननु कथमेतावता सर्वज्ञत्व पुरुषा तरबुद्ध्य रूढेर्थे पुरुषा तरस्यानुभव रणयोरसंभवादेकस्य त्मन सर्वार्थप्रकाशकत्व ासिद्धेरित्यत अ ह

य ८ द्धिचारा ाक्षी तद्व८ रे पि
नै ापोढु न व दा क्य स्मा८ रो हम् २

थ त्मेति आत्मनि सर्व यवहारप्रवर्तकतय अ त्मसब न्धिनी बुद्धिरात्मबुद्धिस्तस्य श्चार प्रचारो येषु ते आत्मबुद्धिचारा आध्यात्माधिदैवस्थूलसूक्ष्मदेह त्मकास्ते ा साक्षी स्फोरकोऽह यथा तद्वत्तथा परेषु परकीयबुद्धिचारे वप्यह साक्षी साक्षिभेदे प्रमाणाभा वात् म येव सकल जात मयि सर्वं प्रतिष्ठितम् मयि सर्वं लय याति तद्ब्रह्माद्वयमस्म्यह मित्यादि तेर्मय्येवैकस्मिंश्चिदेकरसे

अ त्मनि सर्वप्रमातृतद्बुद्धितत्प्रचारगोचरस्य प्रपञ्चस्य कल्पितत्वावगमाच्च युक्तं मम सर्वज्ञत्वादीत्यर्थः यस्मादेवमहं सर्वसाक्षित्वेन सर्वाधिष्ठानत्वेन च सर्वज्ञः सर्वगतश्च तस्मादपोढुमयमस्य द्रष्टा न भवत्यत्र स नास्तीति वा निराकर्तुं नैव शक्यः केनचित् नचैवाद तुं ज्ञ नेन क्रियया वा प्रकाशयितुमुत्पादयितुमाक्रष्टु वा शक्यो हि यस्मादहम ग्राहकादिप्रपञ्चविलक्षणस्तस्मात्पर परमात्मैवेत्युपसंहारः २

ननु बुध्य रूढ चेत्सर्वं प्रकाश्यते क्षेत्रज्ञेन तदा दर्शनक्रियाया कर्तृत्वाद्विकारित्वादिदोषप्राप्तेस्तस्यानात्मत्वप्रसङ्ग इतिशङ्कां निरस्यति

विकारित्वमशुद्धत्व भौतिकत्व न च त्मन
अशे द्धिसाक्षि॰ द्बुद्धिव ल्पवेदना ३

विकारित्वमि ति आत्मनो न विक रित्व बुद्धिवत्सावयवत्वाभावात्सर्वविकारसाक्षित्वाच्च ततएव नात्मनोऽशुद्धत्वं क्रियागुणयोगित्वमस्ति सकलगुणक्रियावद्वस्तुस क्षित्वाच्च न पि भौ तिकत्वमात्मनो रूप दिहीनत्व त् किंच नात्मनो बुद्धिवदल्पवेदना यथा बुद्धेर्बुद्धितत्ससर्गादिविषया वेदनास्ति नैवमात्मनोऽशेषबुद्धिसाक्षित्वा सर्वबुद्धिस्वरूपतद्विकार दिसाक्षित्वादित्यर्थः ३

अध्यक्षे साक्ष्येऽहंकारादावनुपकारित्वादुपकारपदवाच्यातिशयाजनकत्वादित्यर्थः प्रथमं दूषयति अ यत्रापीति साक्षिण. पूर्णतया सर्वत्र सदा सान्निध्याविशेषात्क ष्ठलोष्ठादीन मपि सिद्धिप्रसङ्गादित्यर्थः ७५

एवमाभासानभ्युपगमे बौद्धादिमतसा यदोषपरिहारानुपपत्तिं स्वयू थ्या प्रत्युक्त्व शास्त्रीयो ब धमोक्ष यवहारोऽपि तेषां न सिध्यतीति वक्तुं विकल्पयति

अर्थी दु खी च य श्रो । सत्वध्यक्षोऽथवेतर
अ यक्षस्य च दु खित्वमर्थित्व च न ते मतम् ७६

अर्थी ति यो दुःखित्वेन मोक्षार्थित्वेन च प्रसिद्धो गुरूपदेश श्रोता स एवाध्यक्षो मतस्ततोऽ यो वेति विकल्पार्थः आद्ये निरनुग्रहाध्यक्षव दिन' तवापसिद्धा तप्रसङ्ग इति दूषयति अध्यक्षस्येति आत्माभासानङ्गीकारवादिनस्ते द्वाराभावादविद्यातत्कार्यसंब धासिद्धेस्तेन च विनार्थित्व द्यसिद्धेराभासाभ्युपगमप्रसङ्ग इत्यर्थ ७ .

द्वितीयं दूषयति

क ध्यक्ष सदस्मीति नैव सद्ग्रहमर्हति
सदेवासीति मिथ्योक्ति श्रुतेरपि न यु यते ७७

कर्तेति श्रोतुरर्थिनोऽध्यक्षस्य च भेदपक्षे कर्ता कर्तृत्व दिधर्मको विकारी श्रोता जडवर्ग पतितत्वात्सदहमध्यक्षोऽस्मीति सद्ग्रह सदानिश दनि दिष्टब्रह्मात्मग्रहं नार्हति विरोधादित्यर्थः यद्वा सदध्यक्षो निर्विकार आत्माहमस्मीति सद्ग्रहं यथार्थबोधं नार्हति न लभत इत्यर्थ. श्रुतिब धप्रसङ्गाच्चायं पक्षो न युक्त इत्याह सदेवेति ७७

चिदाभासानभ्युपगमपक्षे ब धमोक्षानुपपत्तिमुपपाद्य स्वपक्षे तदुपपत्तिमाह

अविवि योभय वरि श्रुतिश्चेत्स्य द्ग्रहस्तथा
अस्मदस्तु विविच्यैव त्वमे ति दे दि
प्रत्यया व यिनि त्व दोष स ते ७८

अवि वेच्येति उभयम त्मानमहंकारं च द्वयमाभासद्वारेण विवेकापन्नमविविच्य विविक्तमकृत्वा यथा प्राप्तमर्थित्वाद्युपादाय श्रो तृत्वेन स्थितं प्रति तत्त्वमसी तिश्रुतिर्वक्त्यात्मतत्त्वमिति चेत्पक्षस्तद तथा यथाश्रुत्युक्तस्य ग्रहो ग्रहणं स्यादिति योजना अयमभिप्राय.

अ तःकरणादौ चिदाभासोदयेपि सति तद्गतविकार ध्यासादविवि क्ताहंकार आत्मार्थित्वादिसंपन्नो मुमुक्षुतां प्रतिपद्यते तं तथैवाविवे कावस्थं त्वमित्यनूद्याभासद्वारा साभासा तःकरणस क्षितया लक्षयित्वा तेजोबन्नादिजगत्कारणत्वेनोपलक्षित सच्छ दवाच्यं ब्रह्म तदित्यनूद्य जीवेनात्मना नामरूपसंघातानुप्रविष्टत्वेनापरोक्षप्रत्यक्तया लक्षयित्वा त्व तदसीति श्रुतिरुपदिशति आत्मतत्त्वमिति तया ग्रहणमुपपद्यत इति अहंकार एव श्रोता स्यात्किमात्माभासाभ्युपगमेनेति स ख्यमतमनूद्य दूषयति असदस्त्विति प्रत्यया व यहंकारः यदि वाक्यमस्मदः प्रत्यक्चैत यादहंकारं विविच्यैव त्वमेवेति प्रत्यया वयिनिष्ठत्वं वदेत्त दोक्तो दोषः श्रुतेर्भि न्योक्तित्वप्रसङ्गरूपः प्रसज्यत इत्यर्थः ८

तर्ह्यहंकर्तृविषयोऽप्युपदेशोऽध्यक्षे पर्यवस्यतीत्याशङ्क्याभासान भ्युपगमे तदपि दुर्घटमित्याह

त्वमित्य यक्षनि श्चेदह ध्यक्षयो कथम्
धो वाच्य ए त्र येन त्वमिति लक्षयेत् ७९

त्वमिति त्वमिति पद अहंक रवाचि सदध्यक्षं बोधयति चेदहंक राध्यक्षयो संब धम्र म तरेण वाक्यार्थबोधानुपपत्तेरहम य

क्षयोः संबन्धोऽत्र वाच्य एव स कथमुपपद्यते येन संब धेन त्वमिति पदमध्यक्षं लक्षयेदित्यर्थ. ७९

अस्ति संब ध इहेत्याशङ्क्य परिहरति

द्रष्टृदृश्यत्वस धो यद्यध्यक्षे क्रियेत्कथम् ८

द्रष्टृदृश्यत्वेति यदि द्रष्टदृश्यत्वसंब धोऽभ्युपगम्यते तदापि सब धग्रहणमनुपपन्नम् अहंकारस्य जडत्वात्संब धग्रहणायोगादध्यक्षस्य तद्ग्रहणमितिवक्तव्यम् अक्रिये निर्विकारेऽध्यक्षे कथं संब धग्रहणकर्तृत्वमित्यर्थः ८

मास्तु संब धग्रहणं तथापि तादात्म्योपदेशो भविष्यतीति शङ्कामनूद्य दृष्टविरोधा मैवमिति परिहरति

अक्रियत्वेऽपि ताद त्म्यम यक्षस्य भवेद्यदि
आत्म यक्षो ममास्तीति सब ध ह न धी ८१

अक्रियत्वेऽपीति यथा लोके घटस्य शौक्ल्यमिति घटशौक्ल्ययो सं धाग्रहणे शुक्लो घट इति वाक्यतादात्म्यधीर्नेति तथा ममात्म यक्षोऽस्तीति संब धाग्रहणेसति न ताद त्यधीः श्रुतितो ज येतेत्यर्थः ८१

एष म आत्मा तर्हृदये अणीयान् एष म आत्मा तर्हृदये एतद्ब्रह्मेति शास्त्रादस्त्यहंक राध्यक्षयोः संब धग्रह इति शङ्कामुत्थ प्य निराकरोति

स ध हण श दिति चे म यसे नहि
पूर्वोक्त स्युरि धा दोषा हो वा स्या ममेति च ८२

स ध हणमिति नहीत्युक्तं व्यनक्ति पूर्वोक्ता इति अहकारस्य जडत्वात्संब धग्रहीतृत्वं न घटते नाप्यध्यक्षस्य निर्विकार

त्वादिति द्वौ दोषौ जन्प्रति श्रुतेर्बे प्रकत्व संभवस्तृतीयो दोष इति त्रिधा दोषाः स्युः यदि कथंचित्संब धग्रहणं कल्प्येत तदापि ममा ध्यक्षोऽस्तीति संब धग्रहणं स्यान्नत्वहमेव ध्यक्षोऽस्मीति तादात्म्या ध्यासानङ्गीकाराच्चकारा ममाध्यक्षोऽस्तीत्यपि न घटतेऽहंकारस्य जड त्वादित्यभ्युच्चय ८२

एवमात्म नात्मनो परपक्षे संब धासिद्धिमुक्त्वा स्वपक्षे मिथ्याता दात यसंब ध इति दर्शयति

अदृशिर्दृशिरूपे भाति द्धिर्यदा तदा
त्यया अपि तस्या स्युस्तप्तायोविस्फुलि त्। ८३

अदृशिरिति यदाऽदृशिरचेतना बुद्धिर्दृशिरूपेण सदा भातीत्य भ्युपग यते तदा तस्या बुद्धेः प्रत्यया वृत्तयोऽपि तप्त योविस्फुलिङ्गा नाम यात्मत्ववद्दृशिरूपाः स्युरित्यर्थ ८३

अस्मि पक्षे लौकिकवैदिकव्यवहारसिद्धिरपि सुसंपादेत्याह

अ भासस्तदभ वश्च दृशे सी ो न चा यथा
लोकस्य युक्ति त स्या । तद्ग्रहश्च थासति ८४

आभास इति सीम्नोऽवधिभूताया दृशेश्चिदात्मनः सकाशा देव लोकस्याभासस्तदभावश्च प्रत्ययश्च तदभावश्च स्यातां युक्तितो युक्तेरुपपत्तेर्नचा यथा तथासति आभासानभ्युपगमेसति प्रत्ययभावा भावयोः प्रत्ययग्राह्यत्वायोगात्ततोऽत्य तमेव विविक्तस्य चात्मनस्तद्ग्राह कत्व नुपपत्तेर भासद्वारा तु संब धादात्मनो बुद्धिवृत्तिभावाभावसाक्षित्व मुपपद्यते बुद्धेश्च तद्ग्र आत्मग्रहोऽहमस्मीत्युपपन्न स्यादित्यर्थः ८४

तप्तायोवि फुलिङ्गवदिति दृ । ताभिधानादात्मनो विकारप्राप्तिं शङ्कते

न वेव शि सङ्क्रान्तिरय पि ऽग्नि वद्भ त्
ाभ स दित्ये द द तद्नि र तम् ८५

नन्वेवमिति । अयःपि डेऽग्निसंक्रान्तिवत् बुद्धौ दृशिसक्रा ति विंकारो भवेदित्यर्थः परिहरति मुखाभासवदिति तदेतच्चोद्य मादर्शे मुखाभासवदिति दृष्टा तेन प्रब धेन निराकृतमित्यर्थः यथा मुखस्य दर्शे प्रतिबिम्बितस्य तत्स्थत्वेन रूपेण मि ज्यात्वं तथा बुद्धौ प्रतिबिम्बितस्य चिदात्मनो बुद्धिधर्मत्वेनावभासो मृषेति पूर्वमुक्त सर्वमिहानुसंधेयमिति भावः ८५

त हि कथ तप्तायोविस्फुलिङ्ग ष्टा त उक्तस्तत्र विकारप्रसिद्धेर्दार्ष्टा न्तिकाननुरूपत्वादित्याशङ्कच विवक्षितांशस्येहापि संभवा मैवमित्याह

कृ ायोलोहिताभासमित्येतदृ यते
द ततुल्यत्व न वात्मना चित् ८६

णवर्णमयो लोहित भास लोहितवर्णमवभास इत्येतदेता वदेव दृष्ट दृष्टान्त उच्यते जडाया बुद्धेः चैत याभासत्वमित्यर्थः सर्वांशसाम्यमनुपपन्नमित्याह ष्टदार्ष्टा तेति अप्रकाशाद्यात्मनो मुखादेश्च द्रादिदृष्टान्ताभावप्रसङ्गादिति भावः ८६

दृष्ट ते विविक्षितमंशमुक्त्वा दार्ष्टान्तिकेऽपि तथाविधमश दर्श यति

थैव चे ना ास चित्त चैत वद्भवेत्
ख भा ा यथादर्शे आभासश्चोदितो मृष ८७

तथै ति चेतनाया आभासो यस्मिंस्त तनाभास चित्त चैत यवच्चेतनमिव भवेत्स चाभासो यथादर्शे मुखाभासोऽविकृत एवमेवे

हापि द्रष्टव्य आभासश्चोप धिस्थतया दृश्यम नो मृषा मिथ्येत्यु दित उक्त एवेत्यर्थः ८

कस्माच्चिदाभासव्याप्त्या चित्तस्य चेतनत वभासोऽभ्युपगम्यते न स्वत इति शङ्का न कार्या तत्र प्रमाण याययोरभावादित्याह

चित्तं चेतनमित्येत स्वयुक्तिविव र्जि म्
देह पि सङ्ग ाच्च रादे थैव च ८८

चित्तमिति उत्पत्तिविनाशवत्तया यद्दृश्यस्यापि चित्तस्य चेच्चे तनतास्वभावः स्यात्तदातिप्रसङ्गश्च दुष्परिहर इत्याह देहस्येति ८८

इष्टापत्तिमाशङ्क्य परिहरति

तद स्त्विति चेत्त लो यतिक गते
न च धी रिर ीति य ाभ ो न चे सि ८९

दपीति अवैदिकत्वप्रसङ्गादित्यर्थ किंचाभासानभ्युपगमे द्वाराभ वादहं ब्रह्मास्मीति आग तुकं वाक्यजन्यमैक्यज्ञान न सिध्ये दित्याह नच धीरिति चेतसि यद्याभासो न भवेत्तदा ऽ शिर्ब्रह्मा स्मीति धीर्न भवेत्केवलस्य चित्तस्य जडत्व च्चि मात्रस्य च कूटस्थत्वा दित्यर्थ· ८९

ब्र ास्मीति धियोऽभावे का क्षतिरित्यत आह

द ीति धियोऽभ वे यर्थ स्या त मस्यपि
दस्मद्विभा ाज्ञे स्य दर्थवदिद वच ९

दस्मीति अ ययवधारणार्थ तत्त्वमसिवाक्यमैक्यग्राहकमुक्त धियोऽभावे यर्थमेवाप्रमाणमेव स्यादित्यर्थ· अस्तु वैयर्थ्यं तद्वाक्य श्रोतणां सर्वेषां झटिति ब्र ास्मीति बुद्ध्युत्पत्त्यदर्शनादित्य शङ्क्याह युष्मदस्मदिति अधिकारिण प्रमितिजनको वेद इति न्य य त्स य

क्पदार्थविज्ञ नवत एव वाक्यार्थबोधेऽधिकारादात्मान त्मविभागज्ञान वत्येव पुंसीद वाक्यमर्थवन्न सर्वा प्रति झटितीत्यर्थः ९

तमेव यु मदस्मद्विवेकं दर्शयितुमुपक्रमते

ममेद त्ययौ ज्ञेयौ यु मद्येव न सशय
अहमित्य दी स्यादयमस्मी ति चोभयो ९१

मेदमि त्यादिना इदं पुत्रादि ममेति च प्रत्ययौ युष्मद्य नात्म येव ज्ञेयौ पुत्रादिबा ार्थस्य देहाध्यासप्रणालिकयैवास्मदर्थे प्रवे शाद्ब ह्यार्थसब धोऽप्यनात्मधर्म एवेति युक्तमुक्तम् ममेदमिति प्रत्ययौ युष्मद्येवेति न संशय इति सर्वत्रानुषज्जते अहमिति प्रत्यय आभा सद्वारात्मभूते यावहारिकेऽस्मद्यात्मनि अहंकर्तरीष्टः स्यादहमित्ये वोल्लेखदर्शनात् अयं देहादिरस्मीति चोभयोरात्मानात्मनोः प्रत्यय इत्यर्थः ९१

आत्मानात्मविषयाणां प्रत्ययानां सकी तयाऽसंकीर्णतया च विषयानुक्त्वोक्तविवेकसिद्ध्यर्थं तेषां गुणप्रधानभावेन विशेषणविशे य भावो ग्रा इत्याह

अ यो पेक्षया ते प्रधानगुणते यते
वि ेष वि ेयत्व तथा ाह्य हि रि त ९२

अ यो येति स्पष्टम् ९२

विशेषणविशे यत्व युक्तितो ग्राह्यमित्युक्तमेव विविच्य दर्श यति

ममेद येतन्म ध्यमस्य विशेष म्
ध ी गो था द्वद्देहोऽहकृरेव च ९३

ममेद द्वय मिति म यमस्य पूर्वश्लोके मध्ये निदिष्टस्यास दर्थस्यात्मनो विशेषणमिदं ममेति च द्वयं मनु योऽहमिति प्रत्ययापे क्षयेत्यर्थः तत्रोदाहरण धनी गोमा यथेति यथा धनादीदंत्वा स्पदं सद्देहापेक्षया ममत्वास्पदमहंकर्तुः सिद्ध तद्वत्स्थूलो देहोऽहंक र्तुरात्मनो वा धनाद्यपेक्ष्याहंत्वास्पदतया विशेषणमेवेत्यर्थः चका रादात्मनोऽपि सोऽह ज्ञातेत्याद्युल्लेखे स्थूलदेहमपेक्ष्य प्रधानभूतोऽ य हकर्ता विशेषणमिति योज्यम् ९२

एतत्सर्वं यदधीनसत्ताप्रकाशकं तत्रारोपित सत्तस्य सदा विशेषणं भवेदपि तेन साक्षिणा न स्पृशत इत्यादिषु यो निरपेक्षसिद्धः स शुद्ध आत्मेति युष्मदस्मद्विभागज्ञस्य भवेदेव वाक्याद्वाक्यार्थज्ञान मिति प्रमाणमेव वेदा तव क्यमित्यभिप्रेत्योपसंहरति

बु रू द सर्वं हक । च ।क्षिण
स्म त्सर्वा भासो ज्ञ किंचिद यस्मृ श सद ९४

बुद्ध्य रूढ मि ति बुद्ध्य रूढं बुद्धिवृत्तिक्रोडीकृत सर्वं देहतत्सं बन्धिविषयजातं साक्षिणो विशेषणं गुणभूतमिति योजना न के लमेतावत्किंच साहंक । अहंकर्त्रा साभासमनसा सहित सूक्ष्मोऽपि संघातः साक्षिणो विशेषणं तस्मिन्नध्यस्ततया तदवभास्यत्वादित्यर्थः यस्मादेवं परमार्थतः किंचिदप्यस्पृशन् सदा सर्वं साभासद्वारावभास यतीति सर्वावभासस्तस्माज्ज्ञो ज्ञानस्वरूप एव सदात्मेति विवेको युक्त इत्यर्थः ९४

एष विवेकिनां मार्गो विपरीत स्त्वविवेकिनां क्षेत्राद वप्यात्मनो विशेषणत्वप्रतीतेरित्याह

तिलो मिद र्वं यथो गे द्वित
अविवेकधियामसि स्ति विवे ाम् ९५

अ लो मिति बाह्य थेपहृतचेता लोकस्तस्य बुद्धिर्लोकबुद्धि स्तस्या इति बाह्य र्थसत्त्वप्रधानं लोकबुद्धिमपेक्ष्येति यावत् तथाच ब ह्यार्थ प्रधानीकृत्य यदिदं यथोक्तविशेषणविशे यादि सर्व प्रतिलो ममनात्मभूतं तदविवेकधियं विवेकज्ञानशून्यानां दृष्ट्यास्ति वर्तते विवेकिनं तु ष्ट्या सर्वमेतद्विशेषणादिकं दृश्यरूपं नास्ति न वर्तते अतो विवेकिनां बुद्धिमात्म यवतारयितुं विशेषणविशे य दिप्रब ध कल्पना यथा प्रतीतिसत्तामादाय क्रियतेऽध्यारोपापवादन्यायेनेति भावः ९५

न व वयव्यतिरेकाभ्यामेव सर्वसंसारविनिर्मुक्तात्मावगमात्किं वा क्येनेत्याशङ्क्याह

अ य यतिरेकौ हि दाथस्य पदस्य च
स्यादे दहमित्यत्र रि रे ावधार ९६

अ वयव्यतिरेकौ ही ति पदार्थस्या वयव्यतिरेकौ नाम आत्म पदार्थो द्रष्टा साक्षी न कदापि दृश्य' साक्ष्यो वा भवति तस्यालुप्त प्रकाशस मात्रतया स्वतःसिद्धत्वादतोऽनन्याश्रयत्वान्न कदा कस्यापि विशेषणमात्मा तथा यद्दृश्यं साक्ष्य चाहंकारादि विषया तं तद या धीनप्रकाशसत्ताकतया याश्रय सत्सदा विशेषणभाव न व्यभिचरति तस्मादनागमापायि दृगात्मरूप सत्यं शुक्त्यादिवत्तद्विपरीतमसत्यं रज तादिवदित्यनृतजडपरिच्छिन्नपर धीनपरागर्थव्यावृत्त' सत्यज्ञ नान त प्रत्यगान दरूप आत्मेति विवेचनम् पदस्या वयव्यतिरेकौ नाम आत्मा चैत य प्रज्ञान ब्र सदित्यादिपदानि कर्मेत्याद्युपपदविधुराणि केवल स्यैवात्मनः समर्पकाणि न विशेषणतद्विशिष्टविषयाणि असामर्थ्यात् कर्ता भोक्ता ज्ञ त द्र । श्रोता वक्ता ग ता कृशः स्थूः इत्यादीनि

तु न केवलपूर्णात्मविषयाणि अ याधीनक्रियाद्युपरागदशायामेव प्रयुज्यमानत्वादिति विवेचन एवं पदस्य पदार्थस्य वाऽ वयव्यतिरेकाविति यदेतदहमित्यत्रास्मदर्थविषयेऽवधारणे युक्तिरेव स्याद्विवेकावधारणोपायम त्रं स्यान्नतु वाक्यार्थे पदार्थैक्ये व्यापारोऽस्येत्यर्थः तस्मादेतावतापि विवेकेन देहादिवैलक्ष येऽवधारितेऽपि कोहं तर्हीति जिज्ञासाया अनुवृत्तेस्तत्त्वमसीति वाक्यं जिज्ञासितस्वरूपविशेषसमर्पकमवश्यमपेक्षितव्यमेवेति भावः ९६

किंचावस्थ त्रयं परस्परव्यभिचारिचैत यात्मा तु न कदापि यभिच रीति प्रकारा तरेण त्मानात्मविवेकं दर्शयति

न द्राक्ष हमित्यस्मि सु ऽ य मनागपि
न रयति द स्वा प्रत्य निषेधति ९७

नाद्राक्षमिति अस्मि सुषुप्तेऽत्रात्मनि अत्र स्थाने वा मनागपि ईषदप्य यदात्मस्वरूपातिरिक्तमहं नाद्राक्ष न दृष्टवानस्मीति परामृशन् जनो न स्वां स्व त्मनो दृष्टिं चैत य वारयति प्रत्ययं तु पुन निषेधति प्रतीयत इति प्रत्यय इति व्युत्पत्त्या प्रम तृप्रमाणप्रमेयादिरूपः सर्व एव ि शेषो गृ ते तस्मात्परस्परव्यभिचारितया दृष्टनष्टस्वभावाभ्योऽवस्थाभ्यो मिथ्याभूताभ्यो व्यभिच री चिद्रूपः साक्षी सत्य आत्मेति विवेक. सिध्यतीत्यथ ९७

एवमुक्ताव वयव्यतिरेकै शास्त्रसंमतौ न स्वबुद्ध्युत्प्रेक्षामात्रकृताविति विश्व साय शास्त्रमुदाहरति

व ोतिर्न हि द्र ुरित्येव विदोऽस्मि ाम्
कौ स्थ्य च तथ ा त्यय तु लु ताम्
यमे वी त्ययावगती थक् ९८

स्वयञ्ज्योतिरिति सार्धेन अत्रायं पुरुष स्वयंज्योतिः नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इत्येवमादिशास्त्रं संविदश्चेतनाया अस्तितां सद्भावं तस्याः संविदः कौटस्थ्यं निर्विक रतां च स्वयमेव ब्रवादिति सबन्ध तथा प्रत्ययस्य प्रमात्रादिभेदस्य लुप्ततामसत्तां च नतु त द्वितायमस्ति ततोऽ यद्विभक्त मित्यादिशास्त्रं स्वयमेवाब्रवादिति पुनरे वा वय एवं प्रत्ययावगती पृथगसंकी । श स्त्रेणैव विवेचिते इति शेषः प्रत्ययो याख्यातः अवगतिश्चैत यम् ,८

एवमव तरवाक्यकृतं युष्मदस्मद्विवेकमुपपत्तित उक्त्वा विज्ञात पदार्थतत्त्वे पुरुषे महावाक्यं फलवद्विज्ञानं जनयतीत्याह

ए वि त क्यार्थे श्रुतिलो सिद्धि
श्रुति त्वमसीत्याह श्रोतुर्मोह पनुत्तये ९९

एव मि ति एवमुक्तप्रकारेण श्रुतिप्रसिद्धितो लोकप्रसिद्धितोऽ वय यतिरेकतश्च विज्ञात वा तरवाक्यार्थे पुंसि सति महाव क्यात्मिका श्रुतिः श्रोतु र्जिज्ञासोर्मोहापनुत्तये सकार्याविद्य निवृत्तिप्रयोजनाय तत्सदाख्यं ब्रह्म त्वमसीत्याहोपदिशतीत्यर्थ ९९

वाक्यश्रवणम त्रा मोहापोहे दृष्टा तं पुर णसिद्धमाह

। द शरथेर्य ुक्तै पानुदत्तम
त वि त्वसबोधे न य । रमूचि ान् १

ेति दाशरथिना रामेण देवकार्यसिद्धये मनु य वतारना त्वेन स्वमाहात् या छादन संकल्पपूर्वक यत्कृतं तदिह तमःशब्देनोच्यते नत्वीश्वरस्य संमोहः संभवति तदुक्तं संक्षेपशारीरके

संकल्पपूर्वकमभूद्रघुन दनस्य नाहं विजान इति कंचन कालमेतत्
ह्मोपदेशम लभ्य निमित्तमात्रं तच्चोत्स र्जे स ते सति दे ि ा

इति हे राम त्व विष्णुरसि न दशरथपुत्रमात्र इत्युक्त्यैव ब्र । द शरथेः संकल्पमात्रकृतं तमो विष्णुत्व च्छादनरूपमपानुदत् एवकारार्थमाह तस्येति यत्ना तर वाक्योपदेशग्रहणातिरिक्तमित्यर्थ १

दार्ष्टान्तिकमाह

अह दस्य नि या ज्योतिषि प्रत्यगात्मनि
स । । सदसीत्येव फल तत्र वि ता १ १

अहश दस्येति एवश दः प्रथमं योज्यः यथायं न्ष्ट त एवं सदसीति वाक्येन सा निष्ठोक्तैव केवलं नानुष्ठापितेति योजना सा का निष्ठेति त माह अहश दस्येति प्रत्यगात्मनि परागर्थेभ्यो व्यावृत्ते शोधिते आत्मनि निरुपाधिके ज्योतिषि साक्षिस्वप्रकाशस्वभावे अहंश दस्य या निष्ठा लक्षणया पर्यवसिता वृत्ति सैवेत्यर्थ॰ तत्र त्व तदसीत्युपदेशमात्रादहं सत् ब्रह्मासीति वाक्यार्थज्ञानोदयमात्रे सति विमुक्तता मोहापोहरूपा फलं भवतीत्यर्थः यद्वा न तस्य दार्ष्टा तिकमेव विज्ञातवाक्यार्थ इति पूर्वश्लोक एव स्थितं द्रष्टव्यम् अयं त्व यथोत्थाप्यते ननु द शरथेर्भवेदेव वि णुत्वोपदेशमात्रा द्वि णुरहमस्मीति झटिति बोधोदयस्तस्य महामहिमसंपन्नत्व त्कथ मिदानींतनस्य कर्त भोक्तृत्यादिप्रत्यक्षाभिमतमिथ्याप्रत्ययगृहीतस्यो पदेशमात्रादह ब्रह्मासीति निर्विचिकित्सं ज्ञानं संभ व्यत इत्या शङ्क्याशोधितत्वंपदार्थस्य पुसः कर्तादिसाक्षिण एवाहमादिशब्दलक्षितस्य ब्र त्वोपदेशान्नानुपपत्तिरत्रापीति परिहरति अहंश दस्येति सदसीत्येव वाक्येन सैव नि ठोक्तेति सब ध॰ अ यत्सम नम् १ १

एवमवगतपदार्थतत्त्वस्य वाक्यादेव समूलसंसारनिवृत्तिफलं ज्ञानं

जायत एवेति स्थिते श्रुते प्राम यसिद्ध्यर्थं कार्यपरत्व कल्प्यमित्या ग्रहो निरथको विद्वदनुभवविरोधादित्यभिप्रेत्याह

श्रु म े चे ात्काय त भवेद्ध्रुवम्
वहार त्पुर पी द्धा यमात्मन १ २

श्रुतमात्रेणेति यथोक्त यायेन वाक्यस्य श्रुतमात्रेण चेदुक्तफलं विज्ञान न स्यात्तत्रं तदा कार्यं कल्प्यं ध्रुवमवश्यं भवेद यथाऽर्थवादादिवाक्यवत्स्वार्थे प्राम य नुपपत्तेः इह तु तथा कल्प्यमस्ति फलस्य सद्य एवानुभवसिद्धत्वादित्यर्थ· स्वयं ज्योतिर्नहिद्रष्टुरिति-श्लोके पूर्वमर्धश्लोकोऽधिकः स्थित इह वायमधे एव श्लोक ृति सहगणनीयम् किंच सिद्धे ब्रह्मात्मनि शास्त्रस्याप्राम ण्यं नाम विपर्यासलक्षणं वा नि फलत्वं वा सशयलक्षणं वाऽनुत्पत्तिलक्षणं वेति विकल्पा क्रमेण दूषयति व्यवहारादित्यादिना नाद्यः यस्म व्यवहारादहं ब्रह्मासीति शास्त्रोपदेश यवहारात्पुर पूर्वमप्यात्मनः स्वयमेव सद्भाव इष्टो बाधकाभावात्तस्याथथावस्थितात्मस्वरूपस्यैव श्रुत्या निवेदन न्न शुक्तिरूप्यज्ञानवदप्रामा यमित्यर्थः १ २

न द्वितीयोऽनुभवविरोधादित्याह

अशनायादिनि त्त्यै तत्काला जायते प्रमा
त्वमस्यादि क्य थे त्रिपु कालेऽ यसशय १ ३

अशन यादीति तत्कालाप्तवाक्यश्रवणकाल एव कालो यस्या. सा तत्काला प्रम अशन याद्युपलक्षितसंसारस्य निर्मुक्त्यै निवृत्त्यर्थं जायते विदुषां प्रत्यक्षमेवैतदित्यतो न निष्फलत्वशङ्कावकाश इत्यर्थः तृतीयम यनुभवविरोधेन निराकरोति तत्त्वमसीति असंशय. संशयो नास्तीत्यर्थ. १ ३

चतुर्थं प्रत्याह

तिब धविहीन ।८ य चा भव त्मन
ज येतै मा तत्र ।८ येव न सशय १ ४

तिब धेति पदार्थाज्ञानं हि वाक्यार्थज्ञानोत्पत्तिप्रतिब धस्त द्विहीनत्वादवगतपदार्थस्य पुंसस्तत्र तस्मिन्नेव वाक्यश्रवणकाले अ त्म येव प्रमा जायेतैव न संशय इति योजना आकाशपु पमस्तीत्या दिवाक्यार्थवदनुभवायो यार्थत्वशङ्कां वारयति स्वयंचेति अनुभ वस्वरूपत्व त्स्वयम त्मनः प्रत्याख्यातुमशक्यत्वादित्यर्थ अतो हुंफ डादिश दवदनुत्पत्तिलक्षणमप्यप्रामा यं नास्तीति सिद्ध सिद्धे ब्र ा त्मनि वाक्यस्य प्रामा यमित्यर्थः १ ४

एवं प्रमाणस्वरूपनिरूपणेनाहंब्र ास्मीति ज्ञानमुपपाद्येदानीं प्रति पत्तव्य र्थस्वभावनिरूपणेनापि तदुपपादयितु विकल्पयति

किं सदे ाह स्मीति किंवा यत्प्रतिप
देव चेदहश द स । ख्यार्थ इ यताम् १ ५

किं सदेवेति तत्त्वमसीति व क्यश्रवणसमन तरं प्रतिपत्त व हमस्मीति किं सदेव प्रतिपद्यते किंवा यदिति विकल्पाथः आद्यम नूद्य तत्र परस्यानिष्टापत्तिरित्याह सदेव चेदिति सता सच्छ दार्थे नाहश दो मुख्य र्थ इ यतां तदा सच्छ दाहंश दयोरेकार्थपर्यवसाना दैका यमेव वाक्यार्थो न ससग इत्यपरोक्षज्ञानसिद्धिरित्यर्थ. १ ५

द्वितीये दोपमाह

अ ८ दह ह तिपत्ति मृषै
सा ख्यग्रहे न सि वार गतेरिह १ ६

अ यच्चेदिति प्रत्यगात्मनोऽ यच्चेत्सत्तदाहग्राहप्रतिपत्तिमृषैव

सा भवेत्संपदादिज्ञानवत् तत्र व क्यस्याप्रामा यमेव प्रसज्येतेत्यर्थ प्रमाणप्रमेयस्वभावपर्यालो .नया वाक्यादेवापरोक्षं फलवदात्मतत्त्व विज्ञानमुत्पद्यत इत्युपपन्नमित्युपसहरति तस्मादिति इह वाक्ये मुख्यग्रहेसति अवगतेर्यथार्थ नुभवस्य वारणा निवार ा न स्तीत्यर्थः

न वात्मनः कूटस्थत्वेन प्रतिपत्तृत्वानुपपत्तौ फलसंब धो नोपपद्यत इत्यस्त्यात्मग्रहे निवारणेत्याशङ्क्याह

थी त्ययश्चै यदाभ सौ तदथ ।
योरचितिमत्त्वाच्च चैत ये कल्यते लम् १ ७

प्रत्ययीति प्रत्ययी परिण य तःकरण तत्परिण मश्च यदाभा सौ यस्य चिदात्मन आभासो ययोस्तौ यदाभासौ तयोस्तदर्थता तच्छेषभूततेतियावत् तस्मिंश्चैत ये चिदात्मनि तदाभासद्वारा फलं कल्प्यते किंच तयोः प्रत्ययिप्रत्यययोरचितिमत्त्वाज्जडत्वादपि फल संब धायोगात्फलस्यात्मसंब ध' स्यादित्यर्थः १ ७

निर्व्य पारस्यापि फलसब धे न्ष्टा तमाह

कूटस्थेऽपि फल यो र जनीव जयादिकम्
तदनात्मत्वहे ॰ । क्रि ाया त्ययस्य च १ ८

कूट ति ननु र जतद्भृत्ययोः स्वस्व मिभ वसंब धोऽस्ति राजनि जयादिसब धनिमित्तमिहत्वध्यक्षा"यक्षयोस्ताद्दशस्यादर्शनात्क थमय न्ष्टा तः प्रकृते सगतः स्यादित्याशङ्क्यात्राप्यस्त्यधि ानाधिष्ठे यभावः फलसब धहेतुरित्याह तदिति हेतुभ्यामित्यत्र हेतुत्वा भ्यामिति भावप्रधानता योज्या क्रियाहमात्मिका वृत्तिः प्रत्यर्थमय तीति व्युत्पत्ते' प्रत्ययोऽ त करणसाभास उच्यते साभासवृत्तिवृत्तिमतो रिति यावत् आत्मत्व च हेतुत्वं चात्महेतुत्वे तस्य फलस्य न

आत्मत्वहेतुत्वे तदनात्महेतुत्वे ताभ्यां तदनात्मत्वहेतुत्वाभ्यामिति योजना तथाच क्रिय प्रत्यययोर्जडयोः फलस्वरूपत्वाभावात्फलोपा दानत्वाभावाच्च तद्व्यापारनिब धन फलं तदधिष्ठान एव नि र्यापारेऽपि कूटस्थे यो यमित्यस्ति न्ष्टा तदार्ष्टान्तिकसंगतिरित्यर्थः १ ८

शुद्धस्य त्मना प्रमातृत्वं नास्तीत्यभिप्रेत्येदं विशि प्रमातृकृतं फल कूटस्थे उपचर्यत इति राजदृष्टा तेनोक्तं वस्तुतस्तु चित्प्रतिबिम्बस्यैव स्वोप धि यापारेण स्वात्म यध्यस्तेन विद्यत एव प्रमातृत्वमिति चिदा त्मन एवाविकृतस्य प्रतिबिम्बभावनिब धनः फलसंब ध इति सदृष्टा तमाह

आदर्शस्तु यद भासो ाक र स एव स
यथैव त्ययादर्शो यद भासस्तदा ह्यहम् १ ९

आदर्शस्त्विति येन मुखाकारेण विशिष्टतया अ भासत इति यदाभासः सन्न दर्शे मुखाकारः स एव ग्रीवास्थ एव स न ततोऽ यो यथा बिम्बप्रतिबिम्बयोरैक्यं लोके प्रसिद्धमित्यर्थः एवं प्रत्यय द र्शेऽहंकारो यदाभासो येन चित्प्रतिबिम्बेन आभास्यत इति यदाभासः स चित्प्रतिबिम्बपरमात्मैव न ततोऽ योऽहंकारेऽहमवभासगोचरस्त थासत्यहं ब्रह्मेति वाक्यार्थधीर्घटतेऽध्यस्तांश पोहमात्रेण विना नात्मन कर्मत्वमित्यर्थः १ ९

अयमेव पक्ष आदरणीय इत्याह

इत्येव प्रतिपत्ति स्यात्सदस्मीति च । यथा
त त्वमित्युपदेशोऽपि द्व राभाव दनर्थक ११

इत्येवमिति एवंसति चिदाभ साभ्युपगमेसति सदहमस्मि चकारादहं सदसीत्येवमाकारा प्रतिपत्तिः स्यान्ना यथा आत्मन एव

ाह ारस्यैव वा प्रमातृत्वाभ्युपगमे ति यतोऽतोऽयमेव मार्गोऽनिच्छद्भिरप्यादरणीय इति योजना एवमनभ्युपगमे न केवल प्रतिपत्त्यनुपपत्तिरपि तूपदेशस्याप्यनुपपत्तिरित्याह तत्त्वमिति त्वमथोऽनुवादद्वारेण हि तदर्थभाव उपदेष्टव्यस्तत्रानूद्यमनस्य चित्प्रतिबिम्बस्याभ वस्तदर्थोपदेशो निरालम्बनोऽनर्थक' स्यादित्येतदाह द्वाराभाव दिति ११

एतदेव विशदयति

श्रोतु स्यादुपदेशश्चेदथ त्त्व तथा भवेत्
अध्यक्ष न चेदि ोतृ कस्य द्भवेत् ११

श्रोतुरिति तथा सतीत्यर्थः तच्च श्रोतृत्वमध्यक्ष द यत्र सभवतीत्या अध्यक्षस्येति न कस्यापीत्यर्थः १११

यद्यप्यध्यक्षस्य नोपदेशस्तथापि न वैयर्थ्यमिति शङ्कते

अध्यक्षस्य समीपे ाद्बुद्धेरेवेति चे म मु
न तत्कृतोपक रोऽस्ति क द्य क यते. ११२

अध्यक्षस्येति तत्र बुद्धेः श्रोतृत्व किमध्यक्षसंनिधिसत्तामात्रापेक्षमाहोस्वित्तत्कृतोपक र पेक्षमिति विकल्प्याद्यं प्रत्याह न तदिति तत्कृतः संनिहिताध्यक्षकृत उपकारोऽतिशयो बुद्धेर्नास्त्येव यद्वत्काष्ठादि धनादेः संनिहिताद्बुद्धावतिशयो न कल्प्यते तद्वदित्यर्थ ११२

द्वितीयमुत्थ प्य त्षयति

बुद्धौ चेत्त त कश्चि वेव परि ामिता
आभासेऽपि च को दोष सति श्रुत्या ग्रहे ११३

बुद्धौ चेदिति एवंसति आभास नभ्युपगमेऽध्यक्षस्य परिणामिता ननु निश्चितं प्रसज्येतेत्यर्थ अतो रूपरूप प्रतिरूपो बभूव

एकधा बहुधा चैव श्यते जलच द्रव दित्यादिश्रुतिस्मृत्यनुगृहीत आभासपक्षो निर्दु उपादेय इत्यभिप्रेत्याह आभासेऽपि चेति यद्वाऽस्तु परिणामित ध्यक्षस्येति चेत्त भासेऽपि च प्रमाणसिद्धेऽभ्यु पगम्यमाने तव को दोषो भवि यतीत्याह आभासेऽपीति ११३

आभासपक्षे चिदात्मन परिणामप्रसङ्गाभावं वक्तुं शङ्कामुत्थाप यति

अ भासे परि ामश्चे रज्ज्व दिनिभत्ववत्
सर्पादेश्च तथावोचमाद च ख‹ वत् ११४

आभा परिणामश्चेदिति नैवमाभासस्य मृषात्वोपपत्तेरिति परिहारमाह न रज्ज्वादीति रज्ज्वज्ञानकल्पितस्य सर्पादे रज्जु निभत्ववदनिदमात्मकस्य रजतादेरिदमात्मकत्ववच्च चिदात्माज्ञानक ल्पितस्य बुद्ध्यादेर्मृषैव चिन्निभत्वं चकारादभोक्तृस्वरूपस्यात्मनो भो क्तृत्वाभ सो मृषैवेति सूच्यते यथैव मृषात्वं तथा पूर्वमवोचम दर्शे च मुखत्ववन्मुखाकारत्ववदिति दृष्टा तप्रणयनेनेत्यर्थः चकारान्मु खस्येवात्मनोऽविकृतत्वमप्यवोचमित्यर्थः ११४

अहंकृतेरेवात्मत्वमिति म यमानस्तस्य चिन्निभत्वम क्षिपति

नात्म भासत्वसिद्धिश्चेद त्मनो ह ा‹ थ
मु ादेश्च थक्सिद्धिरिह त्व यो यसश्रय ११५

ना ति आत्मन. केवलस्य ग्रहणादवभासनात्पृथगेवात्माभा सत्वस्य सिद्धिश्चेन्न भवेदाभासावभासेनैवात्मभासो भवेत्तद २ह त्वमसि मतेऽ यो यसश्रय इति योजना ह ान्तश्च विषम इत्याह मुखादेरिति दर्पणादिगताभास यतिरेकेण ग्रीवास्थत्वेन मुखस्य सदा सिद्धिरस्तीति न तत्र योन्यसापेक्षतेत्यर्थ १५

अन्यो याश्रयमेव स्प यति

अध्यक्षस्य थक्सि ावाभासस्य दी ा

आभासस्य तद्दी त्वे क्ष यति रिक्त ११६

अध्यक्ष ेति तथाचाहमिति प्रतायम नोऽहङ्कृत्यात्मक एव चेतन आत्मेति युक्तमित्यभिप्रायः ११६

अहंकृत्यात्मकस्या त करणस्य स्वप्ने दृश्यत्वेनैव यवस्थितत्वात्तदा भासनिरपेक्ष एवात्मा तत्र सिद्ध इति नोक्तव्ष्ट तासगतिरिति परि- हरति

नै ेथक्सिद्धे प्र यस्य द ेै

रथादेस्तत्र शून्यत्व ८ त्ययस्यात्मना ह ११

नैव इरि प्रत्ययस्या तःकरणस्य दृशेर त्मनश्च स्व ाव स्थायां तथा मुखतत्प्रतिबिम्बवत्पृथग यो यनिरपेक्षतयैव सिद्धेरित्यर्थः कुत एतदित्यपेक्षायाम ह रथादेरिति न तत्र रथा न रथयोगा न प थ नो भव ता त्यादिना स्वप्ने रथादिदृश्यराहित्यस्य श्रूयमाणत्वा त्प्रत्ययस्यैव रथाद्याकारमापन्नस्य तत्रात्मना स्वप्रकाशचैत येन ग्रहः तथाचात्मा प्रत्ययसंवलनविनिर्मुक्तः स्वप्रकाशतया भासमान एव स्वप्ने विषयाकाराकारितप्रत्ययसाक्षी सिद्ध इत्यर्थः ११७

. स्वप्नपर्यालोचनया चिदात्मनः प्रत्ययाद्विवेकं दर्शयित्वा जाग्रत्स्व भावालोचनयापि तमाह

अवगत्य हि स याम त्ययो विषय ति

ज यते स दाक र व ो विषयो मत ११८

अवगत्या ही ादिना विषयस्याकृतिरिवाकृतिर्यस्याथवा विषयस्याकृतिरेवाकृतिर्यस्य स विषयाकृतिरिति विग्रह आत्मचैत

न्यव्य से विषयाकारे प्रत्यये जायमाने तस्मि यो विषयाक र. स बाह्यो विषय इष्ट इत्यर्थः १ ८

किंच सबाह्यो विषय ईप्सिततमत्वात्कर्तुः साध्यतयोद्देश्यत्वेनेष्ट तमत्वात्कर्म भवति तद्वास्तद्विषयेच्छावा कार्ये नियुज्यते कुविति प्रेर्यते यत इत्यध्य ह रः आकारसमर्पकस्य कर्मकारकतया विषय त्वमुक्त्वा प्रत्ययस्य करणत्वम ह

मेप्सि तमत्व त्स तद्ध क र्ये नियुज्यते
आकारो य च र्येत करण तदिहो यते ११९

आक रो यत्रे ति यत्र बुद्धिपरिणामे विषयेण आक रोऽर्प्येत अ र्येते तदिह विषयाभिव्यक्तौ करणमुच्यते तत्तद्बाह्येन्द्रियविशेषिता तत्तदर्थाकारा बुद्धि त्तिर्विषयप्रमि तिं प्रति करणमित्यर्थः ११९

विषयकरणे युत्पाद्य कर्तारं युत्पादयति

यदाभ सेन स यास सज्ञ तेति निगद्यते
त्रयमेतद्विवि यात्र यो ज नाति स आत्मवित् १२

यदाभासेनेति यस्य चित्प्रतिबि म्बस्याभासेन सं याप्तोऽह कारः परिणमते स चिद त्मप्रतिबिम्बो ज्ञातेति निगद्यते कथ्यते एवं साक्ष्यं निर्दिश्य ततः साक्षिण पृथगुपल भयति त्रयमिति एतत्त्रय ज्ञाता ज्ञानं ज्ञेय चेति विवि यासाधार येनावगम्यात्र त्रये परस्परापेक्षसिद्धिके आगमापायिनि वर्तम नं स्वतःसिद्धं तदवधि भूतमनागमापायि स क्षिण यो जानाति सम्यगवगच्छति स आत्म वित् त्वंपदलक्ष्यप्रत्यग त्मविदिति योजना तदुक्त श्रीभागवते एकमेकतराभ वे यदा नोपलभामहे त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रय इति १२

विवेकप्रकारमेव विशदयति

स य शयमिथ्योक्ता त्यया यभिच रिण
एकै ावगतिस्ते भेदस्तु प्रत्यय र्पित १२१

सम्यगिति १२१

भेदस्तु प्रत्ययार्पित इत्येतद्दृष्टान्तेन स्पष्टयति

आधिभेदाद्यथ भेदो णेरवग था
अशुद्धि परि ाम सर्व त्ययसश्रयात् १२२

आधिभेदादिति मणेः स्फटिकादेः प्रत्ययसंश्रयादहंकारप्रतिबिम्बकृताभाससंश्रयान्निमित्तादित्यर्थः १२२

ननु ग्राह्यग्रहणग्राहकातिरिक्तात्मसिद्धौ किं प्रमाणमुक्तमेतावता भवतीत्यपेक्षायां तदाह

प्रथन हण सिद्धि प्रत्ययानामिहा यत
अ परोक्ष्य देवोक्तम ान प्रदीपवत् १२

प्रथनमिति प्रत्ययानां विषयाकाराणां जाग्रत्स्वप्नावस्थानां प्रथनं स्फुरण ग्रहणमुपादानं स्थिति । व्यवहारो वा सिद्धिः स्वरूपलाभश्चेह व्यवह रभूमौ अ यतोऽ यस्मादापरोक्ष्यादपरोक्षस्वभावाद्भवितुमर्हति अचित्स्वभावत्वात् अचित्स्वभावत्वं चागम पायित्वात्प्रदीपवदित्येतदेवानुमानमिहोक्तमित्यर्थ विमताः प्रत्ययाः स्वविलक्षणा याधानप्रथनग्रहणसिद्धिका अचित्स्वभावत्वात्प्रदीपादिवदिति प्रयोग एवं सामा यतो दृष्टानुमानेन अत्रायं पुरुष स्वयंज्योतिरात्मैवास्य ज्योतिः तस्य भासा सर्वमिद विभाति इत्यादिश्रुतिप्रसिद्धस्वप्रकाश आत्मनि संभावना दर्शितेति द्र व्यम् १२३

एवमनुमानमात्म युप यस्य विधिमुखेन प्रमाणेनात्मसिद्धिरुक्ता तत्र केचिन्निषेधमुखेनैव प्रमाणेनात्मसिद्धिर्न विधिमुखेनापीति म य ते त मतनिराकरणाय विकल्पयति

किम यद्र हयेत् श्चि म णेन नचित्
विनैव तु प्रमाणेन निवृत्त्या यस्य शेषत १२४

किम यदिति प्रथमस्तुश द एवकारार्थः द्वितीयस्तु वाश दार्थः किं कश्चिद्वादी केनचित्प्रमाणेनैव देहादिभ्योऽ यदात्मतत्त्व ग्र हयेत्किंवा प्रम णेन विनैवा यस्य निवृत्त्या परिशेषित इति विकल्पार्थः १२४

प्रथमपक्षे विधिमुखेनैव प्रमाणप्रवृत्तिः सिध्यतीतीष्टहानि स्पष्टे त्यभिप्रेत्य द्वितीयं प्रत्याह

श देनैव माणेन नि त्तिश्चेदिहो यते
अध्यक्षस्या सिद्धित्व छू यतैव स यते १२५

श देनैवेति श देन प्रमाणेनान त्मनिवृत्तिरेव चेदिहोच्यते इति संब धः तदाध्यक्षस्य अध्यक्षसद्भावस्या यतोऽप्रसिद्धत्वात्परि शेष सिद्धे शू यतैवावशि येत नात्मेत्यर्थः १२५

ननु चेतनाचेतनयोर्विरुद्धरूपत्वकथनेना यनिवृत्तिः श देन क्रि यते तथाचाचेतनविरुद्धश्चेतन परिशिष्यत इति न शून्यताप्रसङ्ग इत्याशङ्क्य परिहरति

चेतनस्त्व कथ देह इति चे । सिद्धित
चे स्या यत सिद्धावेव स्य द यहानत १२६

चे नस्त्वमिति अप्रसिद्धितो नैवमित्युक्तं स धयति चेत नस्येति अयमर्थः सिद्धे हि धर्मिणि प्रतियोगिनि चायमय न

भवतीति त दात्म्यनिषेधेन विरुद्धरूपत्वोपदेश स्यान्न चाद्यापि चेतन पदार्थ. पृथक्सिद्ध इत्यनेनैव तत्साधनेऽ यो याश्रयः स्यादिति १२६

आत्मा नात्य तमप्रसिद्धस्तस्य स्वतःसिद्धत्वादित्याशङ्कते

अध्यक्ष स्व मस्त्येव चेतनस्यापरोक्षत
ल्य एव बोध स्याद यस्य स॰ ादिना १२७

अध्यक्ष इति चेतनस्य स्वतोऽपरोक्षत्वादित्यर्थः दूषयति तुल्य इति एव सत्य यस्यासत्त्ववादिना शू॰यव दिन तुल्यः सम प्रबोधः स्याद्यथा शू॰यवादिन. प्रमाण विना स्वतःसिद्ध शू॰यमात्मेति न प्रबोधसिद्धिस्तथा यक्षस्यापि तवेत्यर्थ १२७

इदानीं स्मृतिबलेन स्वतःसिद्धाध्यक्षसिद्धिं शङ्कते

अहमज्ञासिप चेदमि ति लोकस्मृतेरिह
करण र्म कर्ता च सिद्धास्त्वेकक्षणे किल १२८

अहमज्ञ सिपमिति अहमिदमज्ञासिपमितीह व्यवहारे लोकस्य युगपत्स्मृतिदर्शनादननुभूते स्मृत्यभावात्करणकर्मकर्तारस्त्रयोऽप्येकक्षणे प्रा येन सिद्धाः सोऽस्त्यध्यक्षः स्वतःसिद्ध इति म्यते किलेत्यनभि मतत्वद्योतन त्पूर्वपक्षताद्योतितेत्यर्थ· १२८

एतन्निराकरोति

ाम येऽपि स्मृते शै याद्यै गपद्य विभा यते
मे हण पूर्व स्मृते पश्चात्तथैव च १२९

प्रामा येऽपीति स्मृतेः पूर्व नुभवगमकत्वेन प्रामा येऽपि न युगपत्त्रितयसिद्धिगमकत्वं यत पूर्वं क्रमेण कर्त्रादीनां ग्रहणमभूत्तथैव च पश्चादुत्तरकालं स्मृतेः सभवोऽत शै॰याचैर तर्येणाविलम्बाद्यौगपद्य विभ ॰यते मृषैवेत्यक्षरार्थ अर्थत्रयस्यैकस्मृत्यवभ स्यत्वे निश्चिते

सत्येवं स्यान्नतु तन्निश्चेतु शक्यते यतोऽहमिदं जनामीति क्रमेण व्यपदिश्यतेऽतो ग्राह्यस्फुरणस्य ग्राहकग्रहणाकारतासंभव त्तत्काले तयोर्न भानं संभवति एवंग्राहकस्य प्रतीच स्फुरणसमये ग्राह्यस्य पराचो नास्ति स्फुरणं विरुद्धाकारद्वयस्यैकस्मिन्प्रमाणज्ञाने स्फुरणासंभवात्तथा ज्ञानस्यापि विषयैकाकारत्वात्तत्स्फुरणेन ज्ञातृस्फूर्तेरिति क्रमेणैव ज्ञात्र दिसिद्धिः प्रागुन्नेया तस्म दुत्पलपत्रशतभेदनयौगपद्याभिमानवद्यगपत्स्मृतिरित्यभिम नः शैघ्र्यनिब धन इति भ वः १२९

स्मृतेर्यौगपद्याभावे कारणा तरमाह

अज्ञासि मिद मा चेत्यपेक्षा ज यते ध्रु म्
वि षोऽपेक्ष ते य तत्र नैवैककालत . १३

अज्ञासि मिति इदमित्याकारो हि प्रत्यगपेक्षयोल्लि०्यते तथा मामिति परागपेक्षया धीर्जायते तथाच यत्र विशेषोऽ यप्रतियोगिकोऽपेक्ष्यते तत्रैककालत यौगपद्यं नैव घटत इत्यर्थः १३

स्मृते र्वेपयतः स्वरूपतश्च यौगपद्य संभव त्कर्त्रादिसिद्ध्यैक्य नुमापकत्वानुपपत्तिरित्युक्तं संप्रति कर्त्रादीनां युगपदनुभवसाधनाभावादपि न युगपत्तत्सिद्धिसंभावनेत्या०

अ त्मनो हणे चापि त्रयाणामिह सभवात्
आ० कर्तृ व न स्यात्कर कर्मणो १३१

आ० न इति अयमर्थ. यथा विषयस्य ग्रहणे कर्ता करणं कर्म चेति त्रितयमपेक्षते एवं प्रत्येकं कर्त्रादिग्रहणेऽपि त्रितयमपेक्षणीयं तथाचात्मनः प्रम तुश्चकारात्प्रमेयस्य प्रमाणज्ञानस्य च ग्रहणेऽपि त्रयाणां कर्त्रादीनामिहापेक्षासंभव त्तत्त्कर्त्रादिस्फुरणमन्तरेण तत्तदर्थस्य तदनुभूतत्वनियमासिद्धे कर्त्राद्यनवस्था प्रसज्येतेत्यर्थ तैरेव

कर्त्रादिभिः स्वस्वरूपसिद्धिसंभवात्किमित्यनवस्थेति शङ्का वारयति आत्मनीति आत्म येकस्मिन्नेव स्वसिद्धावासक्तमुपक्षीण यत्कर्तृत्व तदेव करणकर्मणोः सिद्धौ न स्यादित्यर्थ तथ चैकस्मिन्नवभासे कर्त्रादिभावेनान्वीयमानानां तदैवावभासा तरसाधनत्वा वयायोगान्न कर्त्रादित्रितयस्य युगपदनुभवसाधनसंभावनेति तदसिद्धिस्तदवस्थेत्यर्थः १३१

कर्त्रादीनां युगपत्सिद्ध्यभ्युपगमे व्याकरणविरोधोऽपि स्यादित्याह

या ुम्ि च त्क क्रियया कर्म तत्स्मृ म्
अतो हि कर्तृतन्त्र तस्ये न यतन्त्र १३२

या ुमिति कर्तुः क्रियया यद्य सुमिष्टतमं तत्कर्म स्मृतम् 'कर्तुरीप्सिततम कर्मेति पाणिनिना स्मृतमित्यर्थः हि यस्मादेवम तस्तस्य कर्मण' सकलकारकप्रयोक्तृस्वतन्त्रकर्तृतन्त्रत्वमिष्टं न तद्व्यतिरिक्त ध्यक्षतन्त्रता उक्त यायेन तत्साधकासिद्धेरित्यर्थः १३२

तस्माद्विधिरूपेण प्रवृत्त देव प्रमाणादभिमतवस्तुसिद्धिर्ना यनिषेध मात्रावसान दिति नि ीतमित्युपसंहरति

शब्दाद्वानुमितेर्वापि प्रमाण । ततोऽ यत
सिद्धि सर्वपदार्थाना स्यादज्ञप्रति ना यथा १३३

श दाद्वेति अ यतोऽ यस्य प्रत्यक्षादेवेत्यर्थः १३३

जडानां प्रवृत्तप्रमाणादेव सिद्धिरस्तु न स्वयं चेतनस्येत्याशङ्क्याह

अध्यक्षस्य पि सिद्धि स्य त्र ाणेन विनैव वा
विना सिद्धिस्तु न ज्ञ प्रत्यु युज्यते १३४

अध्यक्षस्य पीति येयमध्यक्षस्य सिद्धिरज्ञस्य सा प्रमाणाधीना

नवेति विकल्प्या त्ये स्वरूपप्रकाशमात्रस्य विनाप्रमाणेन सिद्धावपि ज्ञान प्रत्यध्यक्षता तस्य सिध्यतीति दूषयति विना स्वस्येति १३

अध्यक्षस्वरूपमपि विकल्प्य प्रमाण धीनसिद्धिकतां तस्य दर्शय त्वाद्यं पक्षमभ्यनुजानाति

९ मे चेज नत्वे । मति भवेत्
अ स्यैवा या च तद्विज्ञ ने ध्रुवा भवेत् १३५

तस्यैवेति तस्यैव ज्ञानस्वरूपस्य चेतनस्यैवाज्ञत्वमिष्ट चेत्तदा तस्य ज्ञ नत्वे चेतनत्वेऽ या प्रमाणज या मतिरपेक्षणीया भवेत् अ यस्यैवाचेतनस्याहक रस्यैवाज्ञतायां तद्विज्ञानेऽध्यक्षविज्ञाने चा या मतिर्ध्रुवा भवेदिति योजना उभयथापि विधिमुखप्रमाण धीनाध्य क्षसिद्धिरित्यर्थ १३५

अध्यक्षस्य सिद्धस्वरूपत्वा मानापेक्षा नास्तीत्याशङ्क्य सिद्धिश दार्थ एव त र्हि वक्तव्य इत्याह

ज्ञात स्वात्मल भो वा सिद्धि स्याद यदेव वा
ज्ञ त्वेऽन तरोक्तौ त्व पक्षौ सस्म महसि १३६

ज्ञाततेति किं ज्ञ नं सिद्धिः स्वरूपलाभो वा स्याद यदेव वोभया यप्रकारो वेति विकल्पाथः तत्र द्ये दोपमाह ज्ञातत्वे इति अन तरोक्तै तस्यैवाज्ञत्वमिष्टं चेदित्यादिना पूर्वश्लोकोक्तौ पूर्वोक्तविकल्पदूपणप्रसरान्नाद्य कल्पः साधुरित्यर्थः १३६

द्वितायमनूद्य दूषयति

सि द्धि ात्स्वात्मल भश्चेद्य स्त निरर्थक
लोक सिद्ध ा हे भ्यस्तु वस त १३७

सि द्धि दिति निरर्थकत्वे हेतुमाह सर्वलोकेति

वस्तुनः सर्वस्य स्वहेतुभ्य स्वात्मलाभरूपासिद्धिरिति सर्वलोकप्रसिद्ध त्व तत्र प्रमातृप्रमाणप्रय सो व्यर्थः स्यादित्यर्थ १३७

तृतीयं पक्षम सिद्धिपराहतं मत्वा वक्ष्यमाणपक्षविशेषज्ञापनार्थ मुक्तं पक्षं निगमयति

ज्ञानज्ञेय दिवादेऽ सिद्धिर्ज्ञातत्व च्यते
अ॰ क्ष्य ध्यक्षयो सिद्धिर्ज्ञेयत्व नात्मलाभ । १३८

ज्ञान ेय दीति ज्ञानं ज्ञेयं ज्ञाता चास्तीति यस्य वादस्तसि वादे ज्ञातत्वमेव सिद्धिरुच्यते अ॑॑यक्ष्याध्यक्षयोस्तु पुनर्ज्ञेयत्वमेव सिद्धिर्न त्वात्मलाभतेत्यर्थ. अध्यक्षस्य पीत्यादेरपरा योजना अहमज्ञासिषं चेदमित्यारभ्येयता ग्र थेन कर्तृकर्मकरणानां विधिमुखेन प्रवृत्तप्रमाणं देव सिद्धिर्न यथेति प्रासङ्गिकमुपपादितमुपसंहृत्याध्य क्षस्यापि वस्तुत्वाविशेषात्प्रवृत्तप्रमाणादेव सिद्धिरिति प्रकृतमनुसरन्ना ह अध्यक्षस्यापीति वाश द कटाक्षे अध्यक्षस्यापि द्रष्टुरपि प्रम णेन विनैव सिद्धिः स्याद्वेति योजना नैव स्यादित्यर्थः चेतन-त्वादध्यक्षस्य प्रमाणेनविना कथं न सिद्धिरित्यत आह विनेति प्रमाणेन विना स्वस्य वस्तुनः प्रसिद्धिस्तु ज्ञानं प्रमितिं प्रत्युपयुज्यते ज्ञानस्यैव स्वरूपस्फुरणे प्रमाणानपेक्षा न ज्ञातुरध्यक्षस्येत्यर्थ॰ कथ मितिचेत्तत्र वक्तव्यं अध्यक्ष एवाज्ञः स प्रमाणेन विनार्थसिद्धिं साध यिष्यति किं वा योऽ तःकरण दिरिति तत्र द्यमनूद्य दूषयति॰ तस्यैवेति चेतनस्याध्यक्षस्यैवेत्यर्थः ज्ञानत्वेऽहमध्यक्ष इति ज्ञा वत्त्वेऽन्या मतिः प्रवृत्तप्रमाणज या मतिरपेक्षिता भवेदागन्तुकसि द्धेर यनिमित्तत्वादित्यर्थः द्वितीयमनूद्य दूषयति अ यस्यैवेति तद्भिज्ञ न इति तस्य यस्यान्त करणादेर॑॑यक्षविषयविज्ञानेऽ या

प्रम णजन्या मतिर्ध्रुवा भवेदिति योजना उभयथापि विधिमुखेन प्रवृत्तप्रमाणादेवाध्यक्षसिद्धिरित्यर्थः ज्ञाततेति ज्ञातता ज्ञानवत्ता सिद्धिरिति पक्षे तस्यैवाज्ञत्वमिष्टं चेदिति पूर्वश्लोकोक्तविकल्पदूषणप्रसरणमनिवारण स्यादित्याह ज्ञ तत्वेऽन तरोक्त विति यथा व्याख्यातौ स्वपक्षावित्यर्थः अ यत्सम नम् १२८

ननु ज्ञातत त्मलाभातिरिक्ताप्यस्ति स्पष्टता नाम सिद्धिरतो नाप्रसिद्धं पक्षा तरमिति भट्टमतमाशङ्क्य परिहरति

स्प त्वं कर्मकत्रादे सिद्धित यदि कल्प्यते
स्प ताऽस्प ते स्या ाम यस्यैव न च ् न १३९

स्प त्वमि ति स्पष्टत्वं प्राकट्यं कर्मकर्त्रादेः स्पष्टत स्पष्टतेप्य यस्यैव कर्त्रादिविलक्षणस्य साक्षिणश्चिदाभासजननेन स्यातां नत्वात्मनः कर्त्रादिस्वरूपस्य जडत्वादित्यर्थः १३९

एतदेव यतिरेकप्रदर्शनेन स्पष्टयति-

अद्र ुनैव चा धस्य स्पष्टीभावो घटस्य तु
कर्त्रादे स्प ते चेद्द्रष्टृताऽध्यक्षकर्तृका १४

अद्रष्टुरिति अ धस्य दर्शनवृत्तिरहितस्य ज्ञातुर्विषयीभूतस्य घटस्य य· स्पष्टीभ वः स नैव ज्ञानविषयतातिरिक्तो भट्टमते संभवतीत्यर्थः एवसति भट्टमतानुसारिणा कर्त्रादेः स्पष्टता प्राकट्यरूपेष्टा चेत्तदा द्र ृता तद्विलक्षणाध्यक्षकर्तृकावश्यमेष्टव्या तस्म त्कर्मादेर्जडस्य स्पष्टतायाः प्रकाशापरपर्यायाया असंभवान्न स्पष्टता सिद्धिश दार्थः किंतु ानविषयतैवेति कर्त्रादिगतचिदाभास द्वारा तदधिष्ठानभूतश्चिदात्मा विधिमुखेनैव प्रदीप दिन्दृष्टा तानुमानादिना प्रमाणेनावग त य इति भाव १४

अत्र कर्तृकर्मविहीन एव प्रत्ययः स्वमहिम्ना भासत इति वदन्वि ज्ञानवादी बौद्धः प्रत्यवतिष्ठते

अनुभूतेः किमु यस्मिंस्त्वा व्यपेक्ष्य वद
अनुभवितरीष्टा स्यात्सोऽप्यनुभूतिरेव न १४१

अनुभूतेरिति अनुभूतेः संवेदनस्यास्मिन्कर्त्रादावपेक्षया तव किं फलं स्यात्तद्वद न किंचित्फलं तस्याः स्वप्रकाशत्वादित्यर्थः अनुभवितरि आश्रयभूते सेष्टा स्यात्तस्यास्तदधीनत्वदर्शनादिति चेत् त्वं ब्रूयास्तर्हि सोऽप्यनुभविता नोऽस्माकं मतेऽनुभूतिरेव न ततः पृथक् तत्सत्त्वे प्रमाणाभावादित्यर्थः १४१

कथं तर्ह्यनुभूतिरनुभवितानुभाव्य इति भेददर्शनमित्यत आह

अभिन्नोऽपि हि बुद्ध्यात्मा विपर्यासितदर्शनैः
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते १४२

अभिन्नोऽपि हीति बुद्ध्यात्मा बुद्धिस्वभावोऽभिन्नोऽप्येकोऽपि विपर्यासितदर्शनैर्भ्रान्तिबुद्धिभिः पुरुषैर्ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते प्रतीयते संवित्तिशब्दो ग्रहणशब्दपर्यायः १४२

बुद्धेः कारकत्वानङ्गीकाराच्च न कर्त्राद्यपेक्षेत्याह

भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते
सत्त्वं नाशित्वमस्याश्चेत्सकर्तृत्वं तथेष्यताम् १४३

भूतिरिति येषां मते या भूतिरनुभूतिः सैव क्रिया सैव कारकमुच्यते क्षणभङ्गुरत्वेन विरम्य व्यापारायोगात्तेषां मते कस्तस्याः स्वव्यतिरिक्तोऽपेक्षणीयः स्यादित्यर्थः प्रथममनुभूतेरन्यानपेक्षत्वं निराकरोति सिद्धान्ती सत्त्वमिति अनुभूतेरस्याः सत्त्वं स्वरूप

सत्त्वं नाशित्वं क्षणभङ्गुरत्वमिष्टं चेत्तव त र्हि तथा सकर्तृत्वमपी य तामनुभवस्यात्रापि सद्भावादित्यर्थः १ ३

अथ सत्त्वादिरपि धर्मो नेष्यते इति मतं तदा क्षणिकत्वपक्षस्याप्यसिद्धिरित्याह

न कश्चिचे यते धर्म इति चेत्पक्षहानत
न स्तित्वादयो धर्मा नास्तित् दिनिवृ य
न भूतेस्तर्हि नाशित्व ालक्ष य मत हि ते १४४

न कश्चिदिति ननु नास्म भिविज्ञानस्य क्षणिकत्वादयो धर्मा इष्य ते किंत्वक्षणिकत्वाद्यपोहरूप एव क्षणिकत्वादिरि यतेऽतो नोक्त दोष इति शङ्कते .न्विति निराकरोति नेति एवं चेत्तर्हि भूतेरनुभूतेर्नाशित्वं न सिध्येत् हि यस्मात्ते तव भूतेः स्वालक्ष यं मतं स्वेनैव लक्ष्यते ज्ञायते इति स्वलक्षणं तस्य भावः स्वालक्ष य निर्विकल्पमात्रमिति यावत् ततः सविकल्पत्व दक्षणिकत्वासत्त्वान्नाशित्व ज्ञत्वादिव्यावृत्तेरनुभूतेश्च सविकल्पकज्ञानागोचरत्वान्न सत्त्वनाशवत्त्वादिधर्मसिद्धिरित्यर्थः १४

एतदेव स्फुटयति

लक्षणावधिर्नाशो नाशोऽनाशनिवृत्तिता
अगोरसत् गोत्व ते न तद्गोत्वलक्ष म् १४५

स्वलक्षणेति अयमर्थः कार्यं विनश्यन्न निरवधि नश्यति इदमत्र नास्ति इदमिदानीं न स्ति नष्टमिति वा नाशो यवह्रियते यस्मात्तस्मात्किमप्यस्ति विनाशावधिभूतमविनश्य .नुत्पन्नं स्वतःसिद्धं चेत्यभ्युपेयं तदेतदाह स्वलक्षण वधिर्नाश इति स्वरूपमेव क्षण प्रमाण धर्मो वा यस्य स स्वलक्षण सोऽवधि सीमा यस्य

विनाशस्य स तथेति । ग्रह   तथाच त्वन्मते अ विर्भावतिरोभाव ग्गोर धिभूतस्य स्थिरस्याभावान्न सत्त्वविन शयो. सिद्धिरित्यर्थ' किंचापोहपक्षेऽ योन्याश्रयश्च प्रसज्येतेत्याह नाश इति सिद्धे नाशे तद्विरोधिनोऽनाशस्य सिद्धिस्तत्सिद्धौ तदपोहरूपनाशसिद्धि रित्यर्थः यत्तु सामा यमनभ्युपगच्छता बौद्धेनागोव्यावृत्तिर्गोलक्षण मित्यभ्युपग यते तदनुपपन्नं अ यो याश्रयस्य तादवस्थ्यादित्यभि प्रेत्य ह अगोरिति गोर यस्याश्वत्वादेरगोपदाभिधेयस्यासत्त्व निवृ त्तिरभावो गोत्वमिति ते मत, तत्तु न गोत्वलक्षण सिध्यति अश्वत्व स्यापि गोत्व य वृत्तिलक्षणतया परस्परापेक्षसिद्धित्वादित्यर्थः १४५

अपोहवादे दोष तरमाह

योऽपि योऽथ स्या (ोऽ य याभा ए ` १४६

क्षणव -योऽपीति अ याभावोऽक्षणिकाभावः क्षण इति ते प्रसज्यते अतः स्थिरोऽपि क्षणिकताविरोधी त्वयाभ्युपगतः स्यादि त्यर्थः ४६

न वभावो नाम न सतो निवृत्तिरि यते येनातिप्रसङ्ग स्यात्किंतु निरूपाख्य एवा यव्यावृत्त्य त्मनाभिलप्यत इति शङ्कते

भेदाभावेऽ यभावस्य भेदो नामभिरि यते
नामभेदैरनेकत्वमेकस्य स्यात्कथ तव १४

भेदाभ वेपीति अभ वस्य स्वरूपतो भेदाभावेऽपि अगोत्वम श्वत्व अनश्वत्व गोत्वमित्यादिनामभिः स्वरूपभेद इ यत इत्यर्थः दूषयति नामभेदैरिति एकस्य निःस्वभावस्याभावस्य नामभेदैर्निरर्थ कसंज्ञाभेदैरनेकत्वमनेकपद र्थसाधारणतया याव‍ृत्यात्मत्वं तव कथं घटेतेत्यर्थः १४७

किंच भिन्नानां यावृत्तिरपोहोऽभिन्नानां वा तत्राद्यमनूद्य ूषयति

अपोहो यदि भि ाना वृत्तिस्तस्य कथ गवि
न भावा भेदका सर्वे विशेष वा कथचन १४८

अपोहो यदीति भेदप्रतियोगिनामान त्यात्तदवगममन्तरेण तदपोहानवगमात्तस्यापोहस्य गवि वृत्तिः कथं सिध्येदिति शेषः तदसिद्धौ च किंचिदभावस्य क्वचित्सुलभत्वाद्व्यवहार नियमप्रसङ्ग इति भावः द्वितीये दोषमाह नाभावा इति सर्वेऽप्यभावा अजत्वा श्वत्वाद्यपोहरूपा न भेदका न गोरितरेतरव्यावृत्तत्वबुद्धिजनका स्युस्तथा विशेषा वा भावरूपाः ख डमु डत्वादयो भेदका न स्यु भेद्यभेदकयोर्भेदासिद्धेरित्यर्थः १४८

एवच पोहवादे खण्डा गौर्न लमुत्पलमित्यादिविशिष्टव्यवहारासिद्धिरियं ग रित्याद्यधारणस्वरूप०यवहारासिद्धिश्च स्यादित्यभि ेत्यापोह निराकरणमुपसहरति

ामज त्यादयो यद्वत्संविदस्तेऽविशेषत १४९

ना जात्य दय इत्यर्धेन ते तव मते संविदोऽविशेषतो निर्विशेषत्वान्नामजात्यादयो यद्वन्न विशेषणं एवं गवादीनां अगवादि यावृत्तयः ख डादयो था न विशेषणमिति विशिष्ट०यवहारलोप एवेति जीवनमपि ते दुर्लभमिति भावः १४९

यदुक्तं भूतिर्येषां क्रिया सैवेत्यत्र संविदः क्रियाकारकभेदापेक्षा नास्तीति तत्प्रत्यक्षमनुमानं चेति प्रमाणद्वयाभ्युपगमविरुद्धमित्या०

प्रत्यक्षमनुम न वा यवहारे यदी छसि
क्रियाकारकभेदैस्तदभ्युपेय ध्रुव भवेत् १५०

प्रत्यक्षमिति । स्पष्टार्थ　१५

तथाच संवेदनातिरिक्तवेद्यवेदितृस्वरूपमनि छत प्यभ्युपेयमिति बौद्धमतनिराकरणमु संहरति

तस्म न्नील था पीत घटादिर्वा वि पणम्
सविद दुपेय स्य द्येन चा नुभूय　१५१

तस्मा दि　येन चाप्यनुभूयते सोऽपि ज्ञाताभ्युपेय स्य दि त्यर्थः　१५१

संवित्साक्षि यनुमान प्रमाणमाह

रूपादी । यथा य　स्याद्ग ह्य ग्राह स्त ।
प्रत्ययस्तत्तथा य स्याद्व्यञ्जकत्व प्रदीप त्　१५२

रूपादीनामिति　यद्ग्राह्यं तत्स्वा यग्राह्यं यथा रूपादिग्राह्या च संविदिति बौद्धं प्रति प्रयोगो योज्यः　तथावभासकोऽवभा स्याद यो व्यञ्जकत्वाद्घटादे प्रदीपवदिति आस्तिक प्रति प्रयो क्तव्यमित्यर्थः यथा रूपादीनां ग्राह्यत्वाद्ग्राहकोऽ य स्यात्तथा प्रत्ययस्य ग्राह्यत्वाद्ग्राहकोऽ यः स्तात्तथा ग्र हकश्च ग्राह्याद यः स्य व्यञ्जकत्वात्प्र दीपवदिति श्लोकयोजना　१५२

कस्तर्हि प्रत्यय ध्यक्षयोः संब ध इत्यपेक्षायामाह

अध्यक्षस्य दृशे कीदृक ब ध सभवि यति
अ क्षे　दृश्येन मुक्त्वा यो द्र दृश्य म्　१५३
अध्यक्षेण　ता दृष्टिर्दृश्य या ोत्यथापि वा
नित्याध्यक्ष　कश्चिदुपकारो भवेद्धिय म्　५४

अध्यक्षस्येति　द्रष्टृदृश्यसंब धाभ्युपगमे बलादाभासोऽभ्युपग तव्य इति विकल्पयति　अध्यक्षणेति　अध क्ष्येण प्रत्ययेन दृशो

रात्मन की क्सबन्धो भवि यति प रमाार्थको वाऽपारमार्थिको वेति
ि मर्शार्थः तत्राद्यो न्शेः परिणामादिविकारप्राप्तिप्रसङ्गात्सावयव
इत्यभिप्रेत्य द्वितीयमङ्गीकरोति नित्याध्यक्षेति १५३ १५

कोऽसावुपकार इत्यपेक्षाय माह

चो ङ्गि भत्व ाक्स ासिश्च घ दिषु
ोकादिस हि र्य कत्वाद्धिय था १५५

स चोक्त इति सच नित्याध्यक्षकृतो बुद्धेरुपकारस्तन्निभत्व
प्राक् पूर्वमेव मुखप्रतिबिम्बदृष्टा तेनोक्त इत्यर्थः उक्त भासद्वारा
त्मनो न्श्यबाह्यविषयसंब ध वक्तुं साभासाया बुद्धेर्विषयव्याप्तिं सदृ
ष्ट तमाह सव्याप्तिश्चेति यथा घट दि वालोकादिसव्याप्तिर्व्यञ्ज
कत्वात्तथ धियो दृश्यघटादि य प्तिरित्यर्थः १५५

उक्तमेव स्फुटयति

अ ो ो घटो य बुद्ध्यारूढो भ था
धी य हि स्य द्धट रोहो धियो याप्तौ मो भ त्१५६

आ ो स्थ इति यद्वद्यथालोकनिविष्टो घट आलोक रूढो
भवेत्तथा बुद्धिनि विष्टो बुद्ध्यारूढो भवेत् आरूढ इत्युक्ते पुरुपाश्वयो
रिवोपर्यधोभाव इति शङ्कां वारयति धी याप्तिः स्यादिति यद्येवं
विषयव्याप्तिमात्रमेव धियो विषय यञ्जकत्व तर्ह्य त्मनो बुद्धेश्च को विशेष
इत्याशङ्क्य विशेषमाह धियो याप्तौ क्रमो भवेदिति १५६

धियो विषयव्याप्तौ क्रमो भवेन्न त्मन इत्यर्थादुक्त विशेष विश
दयति

पूर्व स्य स्त्यय याप्तिस्ततोऽनु ह आत्मन
कृ ध्यक्षस्य नो युक्त कालाकाशादिवत्क्रम १५७

पूर्वमिति धियो विषय य सि पूर्वं प्रथममिव प्रथम स्यात्ततो विषयाकारताय सिद्धायामात्मनोऽनुग्रहस्तदाकारे प्रतिबिम्बभावस्त द्धलाच्च विषयव्यञ्जकत्वमिति क्रमद्र त्वम यशेषत्व च धिय सिध्य ति न तथात्मन इत्य ह कृत्स्नाध्यक्षस्येति प्रत्यर्थं परिण मभेदेन यञ्जकत्वाद्बुद्धेरेव क्रमो युक्तः कृत्स्नाध्यक्षस्य सर्वविक्षेपास्पदतया सर्वदा सर्वत्रानुगतप्रकाशरूपस्यापरिच्छिन्नस्यात्मनो न युक्त स क्रम इत्यथ देशत कालतो वा क्रमाभावे दृष्टान्त कालाकाशा दिवदिति १५

न वध्यक्षस्यापि भो यविषयावभासकत्वाद्बुद्धेरिव परिणाम प्राप्नो तीत्याशङ्क्य ह

वि ह य क र ा क्ष भ त्
त्ये च रि मी स चि त् १५८

विष ह्णामि ति कारणापेक्षया कर्त्रादिकारकापेक्षया ग्रा शेषे स सत् विषया तरावशेषे च सति यस्य विषयग्रहणं भवेत्स परिणामी स्याच्चित्तवन्नैवम त्मनो विषयावभासन किंतु नित्यसिद्धप्र क शस्वभावेन युगपत्स्वाध्यस्तसमस्तावभासनमित्यतो न तस्मि परि णामशङ्कावकाश इत्यर्थ १५८

यद्यपि तस्योक्तरीत्या भो यविषयाकारपरिणामो नास्ति तथापि ानाकारेण परिण मः स्याद्ब्रह्मण स त्मत्वे सत्यपि तदाकाराव भासस्यागन्तुकज्ञानसापेक्षत्वादित्याशङ्क्याह

अध्यक्षोऽहमि ति ज्ञ न द्धेरे वि निश्च
ध्य विशे ा स्य सि रो १५९

अध्य ोऽ मि ीरि तत्त्वमस्यादिवाक्यादध्यक्ष परम ैवा

हमिति यज्ज्ञान जायते तन्नाध्यक्षस्य साक्षिण परिणामस्तस्याविशेषत्वात्स्वत परतो वा निरवयवस्यासङ्गस्य विशेषासंभवा त्किंतु बुद्धेरेव साभासाया विनिश्चयोऽवस्थाविशेष इत्यक्षरार्थ एतदुक्तं भवति अनेकजन्म नुष्ठितयज्ञादिकापहृतादृष्टदोषनिवृत्तिसस्कारवत्याः सगुण ब्र गोपासन निराकृतचाञ्चल्याया: सांप्रतं विवेकवैरा यशमादिगुणसंस्कृत या पदार्थद्वयपरिशोधनज्ञ नाहितदृढसंस्कारायाश्च बुद्धेस्तत्त्वमस्यादिवाक्यश्रवणसमन तरशोधितपदार्थगतकल्पितभेदांशतिरोधानेनाख डाक रा काचिदवस्था जायते तस्यां प्रतिबिम्बितश्चिद त्मा तादृग्वृत्त्यविविक्ताकारेणाहमिति परामृश्येत अतो विविक्ताकारमेवोपाध्य शापोहेन स्वमेव रूप ब्रह्मेति प्रतिपद्यत इति न तस्मि कोऽपि विशेष उपज यत इति चिदात्मन परिणामाभ्युपगमे परिणामिनश्चित्तवत्स्वा यवेद्यत्वनियमादात्मनोऽप्य य: साक्षी कल्प्येत तदनुपपन्नमनवस्था नादप्रमाणकत्वाच्चेत्यभिप्रेत्याह न तस्यास्ति परो यत इति १५९

यद्याप्येवम त करणस्यैव ज्ञानाकारपरिणामस्तथापि तस्य न ज्ञान फलभागिता किंत्वात्मन एवेत्यभिप्रेत्याहंकर्तुः फलसब न्धे दोषमाह

त्रा चेदहमित्येवमनुभूयेत क्त
सु खविनिर्मोको नाहकर्तरि ज्यते १६

कत्र्र चेदिति कर्त्रा विकारिणा चेदहं मुक्त इति मुक्तानु भूयेत तदा नाह कर्तेति कर्तृत्वोपमर्दनेन सुखदु:खविनिर्मोकोऽसब न्धस्तस्मिन्न युज्यते कर्तुः सुखादिमत्त्वानुभवविरोधादित्यर्थ कर्तुरपि क्रियया सह तदा विलीयमानत्वान्न तस्य फलसब ध इति भाव १६

आत्म यपि कथ फलसब धस्तस्य कूटस्थनित्यत्वादित्याशङ्क्य तत्त्वज्ञानोदय न्ना तरीयकतया बाध्यमानाध्यस्तानात्मसंभेदावभासस्य फलत्वोपचारात्तस्य च त्म येवोपपत्तेरित्यभिप्रेत्या०

बाध ते प्रत्ययेनेह विवेकेनाविवेकवान्
देहादावभिमा ोत्थो दु खीति प्रत्ययो ध्रुवम्
कु ण्डलीप्रत्ययो यद्वत्प्रत्यगात्माभिम निन　१६१

देहाद विति दुःखीत्युपलक्षणम् सुखी कृश. स्थूल' कामी क्रोधात्यादयः कु डलस्य स्वसंबन्धित्वाभिम नकृते तत्सयोगवियोगयोः सुखदुःखे यद्वदिति दृष्टा तार्थः एवं बाध्यस्याध्यस्तत्वमुक्त्वा तस्य बाधमाह प्रत्यगात्माभिमानिनेति अविवेकवानाभिमानिकः प्रत्ययो विवेकेन प्रत्यगात्माभिमानिना शुद्धत्वंपदार्थात्माभिमानिना प्रत्ययेन बाध्यत इत्य वय' प्रत्यगात्माभिग मिनेति पाठा तरे सुगमम्　१६

अत्र प्रा वृद्धेनार्धेन सह गणनयेह वृद्धमर्धमेकीकृत्य अविवेकवता विवेकीप्रत्ययः कस्मान्न ब ध्यते विरोधस्य समत्वादित्यत आह

विपर्य से सद त स्यात् माणस्य प्रमाणत　१६२

विपर्यास ति वैपरीत्ये प्रमाणस्याप्रमाणतापातात्सर्वमसद त शून्या त स्यात् प्र माणिकस्यार्थस्यासत्त्वे प्रतिभासस्य निरालम्ब नत्वापत्तौ निरवधिको बाध इति शू या तत्प्रसङ्ग इत्यर्थः अयम र्धोप्येक　१६२

विवेकेनाविवेकबाधो भवतीति पूर्वमुक्तं प्रपञ्चयति

दाह ेदविनाशेषु खि त्व ना यथ त्मन
नै ह्यन्य स्य द ह दाव यो दु खी भवेत् चित् १६३

दाहच्छेदेति दाहादिदेहोपघातनिमित्तं हि दु'खमनुभूयते

नान्यथ त देहाभिमाननिब धनमन्यथा सुषुप्त वपि प्रसङ्गात् आत्मा च देहादेर य इति प्रमाणसिद्धमतोऽ यगतदाहादिना यस्य दुःखेति प्रसङ्गादध्यासनिब धनं दुःख्यहमस्मीति ज्ञानमित्यर्थः १६३

आत्मनः स्वतो द हादिसब धाभावे प्रमाणमाह

अस्प ९ ददेहत्वा ाह द ो यत सदा
तस्म न्मिथ्य भिमानोत्थ मृ पुत्रे मृतिर्यथ १६४

अस्पर्शत्वा दिति फलित सदृष्टा तमुपसंहरति तस्मा दिति १६४

प्रागुक्तं दृ तं विवृ वन् विवेकीप्रत्ययेनाविवेकी ब ध्यत इत्यु पपादितमुपसहरति

कु ९ हमिति तद्वाध्येतै विवेकि
दु खीति त्य स्तद्वत्केवलाहधिया सह ६५

डलीति केवले शुद्धे ब्र येवाहधी' केवलाहंधीस्तयेति विग्रह १६५

न वदुःखिनो मोक्षोपदेशानुपपत्तेरात्मनोऽपि दुःखित्वमवग यते ततस्तत्सिद्धये शक्तिमत्त्व ग यतेऽतो ना यगतेन निमित्तेनैव दुःखी किंतु स्वतोऽपीति सुषुप्त्यादावपि शक्तिमत्त्वमनिवारितमिति चेत्त त्राह

सिद्धे खित्व इ स्यात्त रि श्छ दस त्मन
मि थ्याभिम न ो दु ी तेन र्थापादनक्षम १६६

सि द्ध ति कस्यांचिदप्यवस्थायां यद्यात्मन केवलस्य दु खित्व प्रमाणसिद्ध स्यात्तथासति छन्दसा इच्छया तच्छक्तिर्दुःखित्वशक्ति क प्येत न सा ल्पयितु शक्यते दु खदर्शनस्या यथोपपत्तेरित्याह

मि येति अत्र ह्यन्वय यतिरेकौ दशितौ तेन मिथ्याभिम ननिब ध नत्वेनार्थापादनक्षमो दु खित्वानुभव इति योजन अर्थादनुपपत्त्या यत दुःखित्वशक्तिमत्वापादनं तस्य क्षमः समर्थोऽयमनुभव इत्य यथो पपत्तिरित्यर्थः तथाच यथादर्शन दुःखशक्तिमत्त्वमपि मिथ्यैवेति भाव १६६

तामेवान्यथोपप त्तिं स धयति

अस् र्शोऽपि यथा स्पर्शमचलश्चलनादि च
अवि क ा मानस चात् नीक्षते १६७

अस्पर्शोऽपीति निरवयवस्य पूर्णस्यात्मनो यथा स्पर्शचलना दिदर्शनमविवेक देव आदिश दाच्छयनोत्थानोपवेशनादि गृ ते चकार त्परिच्छिन्नत्व भिमान तथा मानस मन कल्पितं च दुःख मविवे ादेवात्मनीक्षत इत्यर्थ १६

अविवेकादेव दुःखदर्शनमात्मनीत्येतद वय यतिरेकाभ्यामुपपा दयति

वि ात धि दु ख नु च दि त्
अवि क वेन ाे ग त्यनि त १६८

विवे ति विवेकरूपयात्मधियेत्यर्थः यस्मात्स्थूलदेहविवे क त्मज्ञानेन चलनादिस्थूलदेहसंबन्धिमिथ्य ध्यस्तम त्मनि निवर्त्यते तथा सूक्ष्मदेहाविवेकनिमित्तं दु ख ह्यात्मज्ञानेन समूलं निवर्त्यत इत्यर्थ १६८

अनिच्छतोऽप्यविवेकस्वभावा मनश्चलतीति निमित्तमुक्त्वा नैमि त्तिकमाह

दानु श्यते ख नैश्चल्येनै स्य त्
त्यगात् नि त्तदु नै ाे ते १६९

देति नैश्चल्येसति तस्यात्मनस्तद्दुःखं नैवेत्य वय. उपसहर ति प्रत्यगात्मनि तस्मादिति १६९

एवं युक्तितः प्रत्यगात्मनो निर्दुःखस्वाभाव्ये सिद्धे वाक्यादेव ब्र ।स्मीत्यपरोक्षज्ञानं भवतीत्याह

त्वसतोस्तुल नीडल । ील श्ववदिद भवेत् १७

त्वस ोरित्यर्धेन इदं वाक्यमख डार्थनिष्ठं भवेत्त्वसतोस्त्वं सत्पदयोस्तुल्यनीडत्वादेकार्थवृत्तित्वान्नीलाश्वपदवदित्यक्षरार्थः नीलोऽश्व इति पदयोर्यद्यपि गुणगुणिरूपेण संस्पृष्टार्थविषयत्वं तथाप्येकद्र यपर्यवसायित्वेन साम नाधिकर ये दृष्टा त इति द्रष्ट यम् १७

कथं पदयोरेकार्थनिष्ठत्वं तद्दर्शयति

निदु ख ाचिन योग त्व दस्य दथ
त्यग त्माभिध नेन त दस युतेस्तथा १७१

निदु खे निर्दुःखवाचिना सच्छ देन योग त्सामानाधिक र य त्वंश दस्य तदर्थता तथ प्रत्यगात्माभिधानेन त्वंश देन तच्छ दस्य सच्छ दस्य युतेर्योग त्सामानाधिकर याद्परोक्षात्मता सिध्य तीत्यर्थः १७१

वाक्यमप्यपरोक्षवस्तुप्रतिपादकमित्यत्र न्ष्टा तमाह

